CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.13.

Coll. No. 589

Title Gādādharī

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 589 Subject: Nyāya.

Title: Gādādharī (Anumiti laxaṇa)

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 10.8" by 4.5" Extent: 43 to 83 fol.

Language: Sanskrit. Script: Devanāgari

Remarks: Begins abruptly.

रयसत्त्वेऽपि गोत्वव्यापकताघटकयावत्संबंधांतर्गतसंयोगसंबंधेन प्रतियोगिसामानाधिकरण्यविरहात् अव्याप्तिरिति
शंकेति वाच्यं जलहृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्याप्युक्तधूमाभावस्वरूपतासंबंधावच्छिन्नसंयोगसं
बंधेन द्रव्यात्मकप्रतियोगितेवसामानाधिकरण्यसत्त्वान्नैवं जलहृत्तिद्रव्यमेवतत्प्रतियोगितस्य च प्रतियोगितावच्छे
दकजलहृत्तित्ववैशिष्ट्यकान्तत्वात्तस्य च धूमाभावविशिष्टसकलवह्निमत्तिहृत्तौ मानाभावान्नाव्याप्तिप्रसक्तिः॥१
यदि च जलहृत्तित्ववैशिष्ट्यमन्यतरत्वघटकीभूतभेदप्रतियोगिगोत्वाभाववत्त्वावच्छिन्नभेदविशेषणेनान्यतरत्वावच्छि
न्नविशेषणतया प्रतियोगितावच्छेदककोटिनिविष्टं द्रव्यस्यापि तत्प्रतियोगित्वमित्युच्यते तदा तादृशाभावस्य वि
शिष्टाभावानात्मकतयाऽन्यतरत्वरूपप्रतियोगितावच्छेदककोटिनिविष्टगोत्वाभावाधिकरणधूमाभावाद्यधिकरणाक
ताद्युपपत्तिरिति ध्येयं जलहृत्तिद्रव्यधूमाभावविशिष्टस्यापि घटादेरधिकरणे नियमनोवच्छिन्नतादृशाप्रसिद्धिचारितलुकत्व
लत्व धूमाभावात्मकनिरुक्तविशिष्टाभावप्रतियोगिद्रव्यसामानाधिकरण्यमादायाव्याप्तिमाशंक्य अष्टादिद्र
न्निलयादिध्येयस्यावतारणीयत्वात् अवश्यं तादृशान्यतराभावस्य च धूमाभावस्वरूपतानिक्षेपतुच्छितघुत्तिविशि
ष्टगोत्वाभावस्याभावप्रतियोगित्वासंगतिर्दुर्वारैवेति वाच्यं एतादृशस्थले यस्यापि गोत्वाभावप्रतियोगिकाभावत्वेन रूपेण
जलहृत्तित्वविशिष्टतादृशान्यतरत्वावच्छिन्नप्रतियोगिताकाभावपरत्वात् नैवमप्ययोगोलकभेदाभावस्याप्यगो
लके तादृशस्वरूपाभावात्मकस्वस्य निष्ठजलहृत्तित्वविशिष्टगोत्वाभावाभावस्वरूपतावच्छिन्नस्य प्रतियोगिसामा

श्री॰ दि॰ ग॰
४२

नाधिकरण्येनचयत्रलक्षणव्याप्त्यसक्तिः साध्यतावच्छेदकसंबंधेनव्यापकतायाःलक्षणघटकत्वे प्रागेव दूषितत्वेनोना
योगोळकभेदाघसाध्यस्यलक्षणाघटकत्वसंभवात् ... अयोगोळकभेदाभावादेरपि तद्वृत्तित्वेन वृत्तित्वविशिष्ट
स्याभावप्रतियोगिसामानाधिकरण्यसंभवात् ... धूमाभावस्य गोत्वाभावाद्यप्रतियोगित्वेपि तत्क्षणवृत्तित्ववि
शिष्टत्वाभावप्रतियोगिसामानाधिकरण्य सत्वादतिव्याप्तिस्तादृ ... तादृशप्रतियोगिनः स्वप्रतियो
गिविशिष्टव्यापकताघटकमानसंबंधांतर्गतसंयोगादिनासामानाधिकरण्यविरहात् ... मेमत्वादि
न॰म त्यादावपिघटत्वाभावादिप्रकारकप्रमाभावस्य यावद्व्यापकताघटकसंबंधांतर्गतविशेष्यतासंबंधेनप्रतियोगि
सामानाधिकरण्यविरहेणातिव्याप्त्यनवकाशात् ... वृत्तित्वविशिष्टगोत्वाभावद्व्यान्यतराभावस्यधूमाभा
वस्वरूपतयासंयोगेनप्रतियोगिसामानाधिकरण्यसंभवेपिधूमादिप्रकारकप्रमाभावस्यभाव व्यापकताघटक
संबंधांतर्गतविशेष्यतासंबंधेनप्रतियोगिसामानाधिकरण्याभावात् धूमवान्वह्नेरित्यादावतिव्याप्त्यप्रसक्त्याता
दृशाभावस्यधूमाभावस्वरूपताप्रतिक्षेपानयुक्तइतिवाच्यं तादृशाभावस्वरूपत्वेपि ... धूमादिप्र
कारकप्रमाभावनिष्ठस्य ... वृत्तित्वविशिष्टगोत्वाभावद्व्यप्रकारकप्रमान्यतराभावस्य तत्स्वरूपतया
द्व्यत्वप्रकारकप्रमायाः पितत्प्रतियोगित्वेनतत्रैवसंभवविशेष्यतासंबंधेनतादृशाभावस्यसामानाधिकरण्यसं
त्वादतिव्याप्तिमरस्केरितिः ... पिधूमवान्वह्नेरित्यादावतिव्याप्तिदुर्वारैव धूमाद्यभावस्य धूमत्वादिनाप्रमेय रा॰ म॰
४२

(एवंधूमाद्यभावप्रतियोगितावच्छेदकहेतुसमानाधिकरणाभावोप्रसिद्धः)

सामान्याभावसमनियतत्वेनतद्विशिष्टत्वोपरम्भात् प्रमेयधूमान्यतरत्वेनतत्प्रतियोगित्वात् सद्धि ... धूमत्वादिनाप्रमेयेनास्ती
त्यादिप्रतीतौधूमान्यतरत्वेनप्रतियोगित्वग्रहः ... प्रमेयान्यतरस्य ... प्रतियोगिसामानाधिकरण्यपरिहारेणैव वृत्तित्व स॰
मानाधिकरणधर्मानवच्छिन्नप्रतियोगितानिरूपणीयाभावत्वेन निरुक्तप्रतियोगिता घटत्वाविधधूमत्वावच्छिन्नैवता
दृशाधर्मानवच्छिन्ना च धूमादिमात्रप्रतियोगित्वे तदन्यतरत्वप्रसामानाधिकरण्यं च नायोगोळकाघटत्वादिनेतिमन्य
तेतथापिधूमाभावस्यवह्निधूमोभयत्वावच्छिन्नाभावसमनियतत्वात्तद्भिन्नत्वेन वह्निरपितादृशाभावप्रतियोगितया
योगोळकान्यत्वाभावस्यायोगोळकान्यवृत्तित्वविशिष्टाकाशाभावाभावसमनियतत्वात्तद्भिन्नत्वेनाकाशाभावस्या
पितत्प्रतियोगितया धूमवत्त्वप्रकारकप्रमाभावस्य धूमवह्निशेष्यकत्वविशिष्टद्व्यत्वादिप्रकारकप्रमाभावस
मनियततया द्व्यत्वादिप्रकारकप्रमायाअपितत्प्रतियोगित्वेन धूमभेदस्यधूमवत्संयुभयत्वावच्छिन्नाभावसमनियत ल॰ना
त्वेनतन्मात्रस्यैवतत्प्रतियोगितया हेतुसमानाधिकरणतादृशाभावानांस्वविशिष्टयावद्देशाधिकरणोनतावेनदु
र्भतप्रतियोगिकसामानाधिकरण्यमदसत्त्वे वेत्यतिव्याप्तिः । अथ साध्यतावच्छेदकावच्छिन्नव्यापकतायां
हेतुकायावत्प्रतियोगितानिरूपकाभावानांस्वविशिष्टयावद्देशाधिकरणावच्छेदेनतत्प्रतियोगितावच्छिन्न
सामानाधिकरण्यविवक्षणीयमितिनातिव्याप्तिरिति चेत् तर्हि मातृशीयाप्रतियोगितावच्छेदकसामाना
धिकरण्यं यत्र क्वचेत्तथापि यद्देशाधिकरणोनसाविनतत्वमित्येतावतैवपराभंजरयं ... भावेयावत्स्वरूपत्व ... तत्तेति

गगनाभावेसाध्यत्वा
तदिप्रक (२६)

हेतु

ग॰ टी॰ व्या॰
४४

योगितानिरूपकत्वस्य हेतुसामानाधिकरण्यविशेषणस्य हेत्वधिकरणे च स्वविशिष्टत्वविशेषणस्यैव सार्थक्यप्र
संगः॥ एवं सति च हेतुसमानाधिकरणधूमप्रागभावत्वावच्छिन्नप्रतियोगिताकसाध्याभावमादाय लक्षणसमन्वय
संभवात् व्यधिकरणधर्मावच्छिन्नाभावस्याप्रामाणिकत्वेपि क्षतिविरहेण तादृशाव्याप्तिलक्षणशंकायोगा
त्॥ एवं जलवृत्तित्वविशिष्टगोत्वाद्यभावाप्र
तियोग्यवृत्तित्वेपि धूमादिना तादृशाभावकस्य धूमस्याऽसंगत्वापत्तेः। धूमवृत्तित्वविशिष्टगोत्वाभावस्य वह्न्यन्तराभावस्य ध
स्य जलत्वाभावस्वरूपत्वाद्धूमाभावाधिकरणकधूमवृत्तित्वविशिष्टगोत्वाभावस्य हेत्वधिकरणावच्छेदेन प्रतियोगित्वा
भावस्वरूपतया व्यापकतावच्छेदकत्वं येन तादृशाभावस्य हेत्वधिकरणावच्छेदेन प्रतियोगि
मानाधिकरण्यसत्त्वादसम्भवाद्यतो रिता दोषोतिव्याप्तिरिवेत्यतो लक्षणान्तरमाह॥ यत्समानाधिकरणा
नामिति॥ अत्रापि यत्तत्पदयोः पूर्ववद्यत्तद्धर्मावच्छिन्नपरतया बोध्यो वह्निमान् धूमादित्यादौ साध्यतावच्छे
दकावच्छिन्नव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावो वह्नित्वादिना घटादिभावात्तेषां
चस्वविशिष्टयावद्धेत्वधिकरणवृत्तित्वेन वह्नित्वादिरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरण
तया लक्षणसमन्वयः॥ अत्रापि प्रतियोगिसामानाधिकरण्यनिवेशोक्तक्रमेण धूमवान्वह्नेरित्यादाव
तिव्याप्तिः अतः प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशः तथा च धूमाद्यभावानां वह्निधू
मोभयत्वावच्छिन्नप्रतियोगिताश्रयवृत्त्यादिसामानाधिकरण्यसत्त्वेपि प्रतियोगितावच्छेदकीभूततादृशो

राम
४४

यत्वावच्छिन्नसामानाधिकरण्याभावान्नातिव्याप्तिः इत्यलेन धूमो नास्तीत्यादिप्रतीतौ च द्रव्यत्वादेः प्रतियो
गितावच्छेदकत्वे सा सति घटत्वादेरपि तु धूमत्वादेरेव तद्वत्त्वादेस्तु न तत्प्रतियोगितावच्छेदकत्वमिति धूमादेः साससत
त्वानुपपत्तेः तादृशप्रतीतिविषयाभावस्य धूमाभावादिसमनियतत्वात् प्रतियोगितावच्छेदकं द्रव्य
त्वादिकमपि धूमाद्युभयप्रतियोगितावच्छेदकमिति प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्य
विवक्षणे प्रतिबन्धकाभावस्तत्र शंकायां नावकाशः एतेन धूमत्वावच्छिन्नधूमवृत्तित्वविशिष्टस्य
वह्नित्वरूपेणाभावस्य धूमाभावसमनियततया वह्नित्वमपि धूमाभावप्रतियोगितावच्छेदकमि
पपत्तेः वह्नित्वेन तादृशाभावस्य वह्निवृत्तित्वविशिष्टवह्निर्नास्तीति प्रतीतौ तादृशधूमवृत्तित्वविशिष्टवह्नि
योगितावच्छेदकत्वावगाहनोपगमात् अन्यथा धूमवृत्तित्वविशिष्टवह्निमानिति धूमसत्त्वे वह्नित्वरूप
प्रतियोगितावच्छेदकविशिष्टवह्निरूपप्रतियोगित्वेन तादृशप्रतीत्यनुदयप्रसंगात् अस्तु वा तत्र तादृ
शविशिष्टवह्निसत्त्वस्यतथापि न क्षतिः प्रतियोगितावच्छेदकपदस्य प्रतियोगितावच्छेदकता
पर्याप्त्यधिकरणपरत्वात् अन्येषामपि घटादिभिन्नत्वेन धूमघटान्यतरं नास्तीत्यत्र घटधूमान्यतरत्वमात्र
त्वस्य प्रतियोगितावच्छेदकत्वासंभवात् धूमघटान्यतराभावस्य तादृशप्रतीत्युपपत्तेः नापि घटभिन्नत्वसहितस्य
गौरवात् किन्तु घटभिन्नत्वमात्रस्यैव एवं च तादृशाभावस्य धूमाभावसमनियततया धूमाभावस्यापि
घटभिन्नत्वं प्रतियोगितावच्छेदकं एवं भेदत्वेनायोगोलकभेदप्रत्ययतासाधान्यतराभावस्यैवायोगोलकभे

धूमवद्भिन्नत्वेन तादृशाभावः
घटाभावविशिष्टत्वाभाव
प्रतियोगितावच्छेदकत्वम्
भिन्नत्वस्य घटत्वस्य

सं॰ समानाधिकरणधर्मसंग्रहार्थं)

गा॰ धी॰ शि॰ ४५

ह्रदत्वावच्छिन्नाभावसमनियतत्वं यत्तद्रूपव्यापकत्वे यो गो ... कभेदाभावप्रतियोगितावच्छेदकं एवं च यत्तत्सिद्धत्वेन द्रव्य
त्वावच्छिन्नाभावसमनियतत्वं यत्तद्भेदसमनियतत्वं चाद्यत्वभिन्नत्वमपि द्रव्यत्वप्रतियोगितावच्छेदकता द्रव्यधर्मा
न्तरसमानाधिकरणाभावस्य धर्मभेदसमनियतत्वं वाच्यं तत्सिद्धत्वेन ... प्रतियोगितावच्छेदकसमनेन प्रति
वच्छिन्नाभावो वा प्रमाणो ... दावपि सत्त्वादिति व्याप्तित्वं द्रव्यत्वे व्याप्तिः ... प्रतियोगितावच्छेदकत्वेनेन प्रति
योगितायामन्यूनवृत्तित्वं यदवच्छेदकं तद्रूपविशिष्टवृत्तीयन्यूनवृत्तित्वं च स्वसमानाधिकरणाभावप्रतियोगिता
वच्छेदकत्वे सति स्वसमानाधिकरणत्वं तद्धर्मत्वं च व्यधिकरणधर्मसाधारणं घटत्वसामान्यतरादिनिष्ठप्रतियो
गितायामन्यूनवृत्तित्वे च घटभिन्नत्वादिके । न च वह्नित्वेन प्रमेयं नास्तीत्यत्र प्रमेयसामान्यवृत्तित्वेन वह्नित्वावच्छि
न्नप्रतियोगितायाः प्रतीयते वह्निर्नास्तीत्यत्रापि वह्निरिति तयोः सत्त्वप्रतीयते कल्पयते एकधर्मावच्छिन्नाभि
न्नप्रतियोगिताकल्पने गौरवात् तथा च कालिकादिसंबंधेन हेतुसमानाधिकरणवह्नित्वाद्यवच्छिन्न
प्रतियोगितायामन्यूनवृत्तित्वावच्छेदकाप्रसिद्ध्या व्याप्तिरिति तत्त्वं । वह्नित्वेन प्रमेयं नास्तीति प्रतीतौ
वह्न्याद्यभावप्रतियोगितायामन्यूनवृत्तित्वावच्छेदकत्वमसिद्ध्या ... तादृशाभावप्रतियोगितायाः
तोप्रमेयत्वविशिष्टवित्तस्य ... प्रतियोगित्वं ... स्वीकारसम्भवात् तादृशाभावप्रतियोगितायाः
प्रमेयसामान्यवृत्तित्वस्य वासिद्धेः अथवा प्रतियोगितावच्छेदकपदं प्रतियोगितायाः अनतिरिक्तवृत्तित्व
यदवच्छेदकत्वं तद्रूपं अनतिरिक्तवृत्तित्वं च स्वव्यापकत्वकान्यत्वे सामानाधिकरण्याभावत्वं तथा च
व्यधिकरणधर्मसाधारणमपि घटत्वसामान्यतरादिनिष्ठप्रतियोगितायामनतिरिक्तवृत्तित्वं च घटभिन्नत्वादिके
तादृशप्रतियोगितायां च घटभिन्नत्वादिसाधारण्यापत्तेः वह्नित्वाद्यवच्छिन्नप्रतियोगितायाः प्रमेयसामान्य

स्वपदे प्रतियोगितासमानाधिकरणत्वप्रतियोगिधर्मपदं तत्पदद्वये प्रतियोगितापरत्वाद्ध्येयं वह्नित्वेन प्रमेयसामान्यानिष्ठप्र राम ४५
प्रतियोगिताश्रुत्याप्रसिध्या तदनतिरिक्तवृत्तित्वाप्रसिद्धिरेवं व्यधिकरणधर्मावच्छिन्नाभावासंग्रह अत एव तः स्वव्यापकत्वान्यत्वेति
बोध्यं ३)

व्यधिकरणधर्मसंग्रहार्थं

ग॰ दि॰ प॰ ...

अवच्छेदकत्वेनाभिमतं २)

वृत्तित्वेपि तदनतिरिक्तत्वस्यावच्छेदकं वह्नित्वादिकमेव स्वव्यापकत्वान्यत्वस्य हेतोरप्रसिद्धत्वादिति नानुपपत्तिरित्यो
पीतिरर्थः ... नानाप्रतियोगिताभावाः प्रतियोगितायाः स्वावच्छेदकतदवच्छिन्नसामानाधिकरण्यं विवक्षितं न्यूनवृत्तित्वं
सामानाधिकरण्यघटितमिति व्यधिकरणधर्मपरिग्रहः तत्प्रतियोगितासमानाधिकरणत्वस्य घटत्वप्रतियोगिता
निरूपकाभाववृत्तितावच्छेदकं तदन्यतत्प्रतियोगितावच्छेदकं ... एतल्लक्षणसाध्यतावच्छेदकावच्छि
न्नव्यापकतावच्छेदकप्रतियोगिताकाभावनिवेशे च वह्निमान् धूमादित्यादौ वह्नित्वादिना घटाभावसमनियतत्वेन
घटत्वादिनावह्न्याद्यभावस्यापि तदधिकरणावच्छेदेन वह्न्यादिरूपप्रतियोगिसामानाधिकरण्यसंभवे वह्निघटोभ
यत्वावच्छिन्नाभावस्यापि तथाविधत्वात्तस्य प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्याभावेनासंभवः
त्वेनाव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वमुक्तं अत एव व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमे हेतुस
मानाधिकरणत्वस्याव्यापकतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावस्याप्रसिद्ध्या संभवः अथ स
त्ताज्ञानादित्यादौ केवलान्वयिसाध्यके चाव्याप्तिर्वा भवतीत्यभिप्रायकतया प्रतियोगवृत्तित्वे सत्त्वादेरवस
[illegible] ... विशिष्टसत्त्वादेरात्मत्वादिव्यापकताावच्छेदकतया तदवच्छिन्नाभा
वतिः न वाच्यमात्मज्ञानादित्यादौ ... विशिष्ट
वस्य ... नावच्छेदेन हेतुसमानाधिकरणतया इदं वाच्यं ... साध्यव्यापकतावच्छेदक
वाच्यत्वादेर्विषयतासंबंधेन जन्यज्ञानसविषयविषयकजन्यज्ञाननिष्ठत्वविशिष्टत्वादेः साध्यव्यापकतावच्छेदक
तयातदवच्छिन्नाभावस्यैवावच्छेदेन साध्याभावच्छेदेन च हेतुसमानाधिकरणतया व्यधिकरणधर्मावच्छि

ग्ग·टी·शि·
४६

भावाभावानभ्युपगमेपितादृशाभावाप्रसिद्धिरिति वा प्रतियोगिवैयधिकरण्याघटितव्यापकतायाएवनिवेशनीयत
यानिरुक्तधर्मावच्छिन्नाभावानामपिसाध्यवतिसत्वेनतादृशधर्मेणाव्यापकतावच्छेदकत्वासंभवात्तत्रचसाध्य
तावच्छेदकावच्छिन्नप्रतियोगिताकाभावएवकिंत्वनिवेश्यतेप्रमेयत्वसाध्यकस्थलेकसंयोगसमवायादिरूपव्य
धिकरणसंबंधावच्छिन्नप्रमेयत्वादिविशिष्टप्रतियोगितावच्छेदकताकाभावमादायलक्षणसमन्वयसंभवादि
तिवाच्यंतथासतितद्गुरुत्वसमनियततद्रूपधर्मस्याभावप्रतियोगितानवच्छेदकत्वेनतद्रूपावच्छिन्नसाध्यकत
त्रिविधाभावाप्रसिद्ध्याव्याप्तेः अत्रच्चानवानात्ममहाकालान्यतरत्वादित्यादौतिव्याप्तिवारणायसाध्य
तावच्छेदकसंबंधेनव्यापकत्वंतेनैवसंबंधेनप्रतियोगिसामानाधिकरण्यविवक्षणीयं महाकालान्यत्वविशिष्ट
तावच्छेदकसंबंधेनव्यापकत्वंतेनैवसंबंधेनप्रतियोगिव्याप्तिवारिरेपितत्रहेतुसमानाधिकरणस्यमहाकालान्यत्वविशिष्टघटाघ
वत्वादिसाध्यकस्थलेकालत्वादेर्व्याप्तिवारितेपितत्रहेतुसमानाधिकरणस्यमहाकालान्यत्वविशिष्टघटाघ
साधस्यप्रतियोगितावच्छेदकविशिष्टसामानाधिकरण्याभावेनातिव्याप्त्यसंभवात्तादात्म्यसंबंधेनप्रमेयसा
ध्यकस्थलेतादृशसंबंधेनसाध्यवत्तानितादृशसंबंधेनव्यापकताकामवच्छेदकोस्त्विति तोयः प्रमेयत्वादिरूपसा
वच्छान्वयिधर्मस्तद्वच्छिन्नस्यसंयोगसमवायविषयितादिसंबंधावच्छिन्नाभावानादायैवलक्षणासमन्वयसं
भवात्तत्रभावप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वस्यप्रयोजनविरहेणानिवेशात्तत्रभिवेशेपि
अधिकरणसमवायिसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकप्रमेयत्वादिमद्भेदमादायलक्षणसमन्वयसंभवा राम
४६

धुमवान्

समवायिसंयोगाद्यन्यतमसंबंधेनसापिन्द्रष्टव्यइतिमिश्रोक्तयातादृशासिद्धस्थलेपिसाध्यसंभवत्वादितिकेचित्तन्न तद्वत्
घटत्वाभाववान्प्रमेयत्वादित्यादौदर्शितदिशातिव्याप्तेः स्वप्रतियोगितावच्छेदकावच्छिन्नव्यापकताघटकयावत्सं
बंधेनप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशनमपिनसाततत्पर्यासत्तिहेतुवाच्यत्वादित्या
दौविषयितासंयोगादिसंबंधावच्छिन्नप्रतियोगिताकाभावमादायव्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमे
पिलक्षणसामंजस्यात्प्रतियोग्यवृत्तित्वस्यादिग्रंथासंगतेः। एतेनविषयितासंबंधेनव्यापकतातेनसंबंधेन
प्रतियोगिसामानाधिकरण्यंविवक्षणीयंसाध्यवत्प्रकारकप्रमात्वावच्छिन्नाभावमादायसर्वमुलक्ष
णसंगमनमतिव्याप्तिनिरासश्चेत्यपिनिरस्तं अयत्वत्वादिनावाच्यत्वादीनामभावइत्येतादृशग्रंथासंगतेश्च
ज्ञेयत्वस्यरूपस्यविषयतात्मकस्यविषयतासंबंधेनाव्यापकत्वात्किंतुस्वप्रतियोगितावच्छेदकसंबंधेनव्याप
कत्वंतेनैवप्रतियोगितावच्छेदकावच्छिन्नाभावसामानाधिकरण्यंव्याप्तिवारितिसाध्याद्यभावस्यकिंचिद्वि
शिष्टस्वाभावनिष्ठप्रतियोगितावच्छेदकविशेषणताविशेषेणतादृशाभावत्वरूपप्रतियोगितावच्छेदकाव
च्छिन्नसामानाधिकरण्यापितद्वच्छिन्नभावसामानाधिकरण्याभावात्तिव्याप्तिः किंचिद्विशिष्टस्यस्वस्य
यथाभावः सामानाधिकरण्यसंबंधेनतद्विशिष्टस्याभावत्वविशिष्टस्वसमनियतोपिस्वरूपोतिरिक्तएवाता स्वरूपा
वमाप्रतियोगिकाभावस्येवतदभावप्रतियोगिरूपतायाः सिद्धांतसिद्धत्वात् अतोधूमाद्यभावस्यहृदादिष्ट

तावच्छेदकतावच्छिन्न

सामानाधिकरण्य·प्रभाव
सत्वात्

न्ति विशिष्टधूमाभावाभावविशिष्टत्वावच्छिन्नाभावसामानाधिकरण्येपि न क्षतिः यावदभावानामित्यत्राभा
वपदं भावभिन्नपरं अतः कालिकादिसंबंधेन हेतुसमानाधिकरणस्य वृक्षादिव्यापकतावच्छेदकगुरुत्वाद्यभा
वत्वावच्छिन्नप्रतियोगिताकस्य गुरुत्वादेः स्वप्रतियोगितावच्छेदकावच्छिन्नाभावसामानाधिकरण्यासंभवेपि न
क्षतिः एवं संयोगिकपिसंयोगाभाववान्मेयत्वादित्यादौ कपिसंयोगात्मकाभावस्य लक्षणघटकत्वेपि विपुलापीसत्व
विशिष्टत्वस्य साधकताविरहेति द्विशायवसेयानम्बसावशिभावाविवक्षणयपि जयमाला ज्ञानादित्यादौ दैशिकवि
शेषणतया हेतुसमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूतकालिकसंबंधावच्छि
न्नप्रतियोगिताकाकाशाभावसाधत्वाद्यवच्छिन्नप्रतियोगिताकस्याकाशाभावादेः स्वप्रतियोगितावच्छेदका
वच्छिन्नसाधसामानाधिकरण्यासंभवात् लक्षणसमन्वयासंभव इति वाच्यं आकाशाभावीयताद्दशाभावत्वस्या
दैशिकविशेषणतया साध्यवद्वृत्तेराकाशाभावस्य प्रतियोगितावच्छेदकतया साध्यव्यापकतावच्छेदकत्वविरहे
णतदवच्छिन्नाभावस्य लक्षणाघटकत्वात् अस्तु वा व्यापकतावच्छेदकत्वं तथाप्येवंभावदृत्तित्वविशेषणं इदं वा
च्यं ज्ञेयत्वादित्यादौ व्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकवाच्यत्वाद्यभावस्य प्रतियोगितावच्छेदकानुप्र
वेशेपि तादृशप्रतियोगितावच्छेदकसंबंधघटितव्यापकतावच्छेदकं च नतु तादृशाभावस्य लक्षणघटकत्वेन उक्तप्रतियोग्यवृत्ति
त्वविवक्षणेपि इदं वाच्यं ज्ञेयत्वादित्यादौ विष
यत्वादिव्यासंगतिरिति नन्वप्रतियोगितावच्छेदकसंबंधेन व्यापकताविवक्षणेपि इदं वाच्यं ज्ञेयत्वादित्यादौ विष

यित्वादिव्यासंगतिरिति ननु प्रतियोगितावच्छेदकसंबंधेन व्यापकता

पितादिसंबंधेन वाच्यत्वाद्यभावस्य स्वरूपसंबंधेनाभावस्तस्य च प्रतियोगितावच्छेदकीभूतस्वरूपसंबंधघटि
तवाच्यत्वनिष्ठव्यापकतावच्छेदकवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगिताकतया हेतुसमानाधिकरणतया स्वरूपसंबंधेन
प्रतियोगितावच्छेदकावच्छिन्नवाच्यत्वादिसमानाधिकरणतया च तत्र व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेपि
तन्मादायैव लक्षणसामंजस्यमिति ताद्दशाग्रंथसंगतिः तादवस्थ्यमिति वाच्यं धूमवान्वह्नेरित्यादौ संयोगसंबंधा
वच्छिन्नप्रतियोगिताकधूमाद्यभावस्य कालिकसंबंधेन धूमत्वादिविशिष्टवह्न्यादिना संयोगेन समवायादिसंबंधा
वच्छिन्नप्रतियोगिताकधूमाद्यभावस्य कालिकसंबंधेन ताद्दशजातित्वादिवि
वच्छिन्नप्रतियोगिताकस्य योगोलकादृत्तिजातित्वाद्यवच्छिन्नाभावस्य कालिकादिसंबंधेन ताद्दशजातित्वादिवि
शिष्टयोगोलकीयरूपादिना समं समवायेन स्वरूपसंबंधावच्छिन्नप्रतियोगिताकस्य धूमत्वप्रकारकप्रमावि
शिष्टयोगोलकीयरूपादिना समं समवायेन स्वरूपसंबंधावच्छिन्नप्रतियोगिताकस्य धूमत्वप्रकारकप्रमावि
षयत्वाद्यभावस्य कालिकसंबंधेन ताद्दशविषयत्वादिविशिष्टसंयोगादिध्वंसेन अनुयोगिताविशेषसंबंधे
नताद्दशविषयत्वादिविशिष्टताद्दशविषयत्वाद्यभावेन च समं स्वरूपसंबंधेन विषयतासंबंधावच्छिन्नप्रति
योगिताकधूमत्वप्रकारकप्रमाद्यभावस्य विषयितासंबंधेन कालिकसंबंधेन वा ताद्दशप्रमात्वादिविशिष्टस्य
गोलकादिविषयकज्ञानेन समं विषयतासंबंधेन सामानाधिकरण्यसत्त्वादतिव्याप्तेर्वारणाय प्रतियोगितावच्छेदक
सघटकसंबंधेनैव प्रतियोगितावच्छेदकविशिष्टस्य विवक्षणीयतया धूमाद्यभावस्य विषयितासंबंधेन द्रव्य
त्वादिमतः समवायादिसंबंधावच्छिन्नाभावस्य च प्रतियोगितावच्छेदकसमवायादिसंबंधघटितद्रव्यत्वादिनिष्ठ

व्यापकतायाः स्वरूपादिसंबंधेनावच्छेदकीभूतो योऽव्यत्वादिस्तदवच्छिन्नप्रतियोगिताकस्यस्यप्रतियोगितावच्छेदक
त्वघटकविषयितादिसंबंधेनप्रतियोगितावच्छेदकविशिष्टज्ञानादिनासमं हेत्वधिकरणेप्रतियोगितावच्छेद
कसमवायादिनासामानाधिकरण्यंनसंभवतीतिव्यापकतावच्छेदकतायामपिस्वप्रतियोगितावच्छेदकता
घटकसंबंधावच्छिन्नत्वस्यावश्यंनिवेशनीयत्वेनद्रव्यं वाच्यं ज्ञेयत्वादित्यादौदर्शिताभावानांलक्षणाघटकत्वादि
तिदिक्॥ नचैतल्लक्षणेसमवायित्वादिनावाच्यत्वाभावीयसमवायित्वादिस्वप्रतियोगितावच्छेदकस्यवाच्य
त्वादिव्यापकतानवच्छेदकत्वाद्द्रव्यत्वादिसाध्यकस्थलेकेनताद्रशाभावानांलक्षणाघटकतयाचतत्रताद्रशा
भावाएवदुर्लभत्वमतआह। नेमस्तत्वादिनेतिवाच्यत्वादिनास्तित्वादिपदार्थादेरपिपरिग्रहः। अनुपमितिस्वविशि
ष्यावच्छेदत्वधिकरण्यांतत्वेनप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविवक्षणंहेतुसामानाधि
करण्यशरीरसंबंधावच्छेदनिवेशनंतत्प्रयोजनंचेत्यर्थः। अन्यथानिरुक्ताभावेपुरुषविशिष्टहेत्वधिकरणसा ३
मान्यात्सत्त्वेनप्रतियोगिसामानाधिकरण्यनिवेशापेक्षयाप्रतियोगिवृत्तित्वमेवनिवेशयितुमुचितंसद्धेतावप्य
धिकरणधर्मावच्छिन्नप्रतियोगिताकानांताद्रशाभावानामेवकान्ययितयाप्रतियोगिन्यपिवृत्तेर्लक्षण्यसमन्वय
संभवात् वृक्षिमान्धूमादित्यादौकालिकादिसंबंधेनहेतुसमानाधिकरणस्यस्वरूपावत्वप्रकारकप्रमाविषयता
घमावस्यदैशिकविशेषणतयाहेतुसामानाधिकरण्यनिवेशनेनवृक्ष्यादिभेदस्यप्रतियोगितावच्छेदकताद्रा

स्वसंबंधघटितसाध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविरहेणलक्षणाघटतया प्रतियोग्यवृत्तित्वेपिक्षतिवि
रहात् कपिसंयोगाभाववान्मेयत्वादित्यादौकपिसंयोगादेकत्वैस्साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्ववि
रहेणोदैशिकविशेषणतयाहेतुसामानाधिकरण्याभावेनसाधभिन्नत्वविरहेणचलक्षणाघटकतयाप्रतियोग्यवृत्ति
त्वेपिनक्षतिः धूमवान्वह्नेरित्यादौधूमाघभावस्यप्रतियोगिवृत्तित्वेपिअयोगोच्छेदकान्यत्वादिप्रकारकप्रमाविषयता
श्री भावस्यभावप्रतियोगितायाअयोगोच्छेदकत्वघटितरिक्तस्यप्रतियोग्यवृत्तितासम्भातिव्याप्तिरित्यवधेयं॥ ॥ चक्र
वर्त्तिलक्षणमाह केचित्तिति व्याप्यवृत्तेरिति सद्धेतौ साध्याभाववृत्ति घटत्वादिनासाध्याभावएवलक्षणघटकस्तत्प्रतियो
गितानवच्छेदकत्वस्यसाध्यतावच्छेदकेसत्त्वात्लक्षणसमन्वयः। व्यभिचारिणिसाध्यतावच्छेदकावच्छिन्नसाध्याभाव
स्यापिलक्षणघटकत्वान्नातिव्याप्तिः कपिसंयोगीएतत्वादित्यादावव्याप्तेर्वारणायव्याप्यवृत्तेरितिव्याप्यवृत्तित्वंचनि
रवच्छिन्नवृत्तिकत्वंनत्ववच्छिन्नवृत्तिकान्यत्वं कपिसंयोगीसत्त्वादित्यादौकपिसंयोगाभावादेर्द्वयोऽवच्छिन्नवृत्तिक
तयातदन्यसाध्याभावात् घटत्वादिनासाध्याभावस्यैवलक्षणघटकतयानिव्याप्त्यापत्तेः। निरुक्तव्याप्यवृत्तित्वविशिष्ट
स्यचहेत्वधिकरणवृत्तित्वंबोध्यं अन्यथाकपिसंयोगीएतत्त्वादित्यत्रचकपिसंयोगत्वावच्छिन्नकपिसंयोगाभावस्यमे
हेतुसमानाधिकरणतयागुणादौचनिरवच्छिन्नवृत्तिकतयातमादायाव्याप्तेर्वारणासंभवात् हेत्वधिकरणनिरू
पितनिरवच्छिन्नाधेयतावत्त्वंहेत्वधिकरणनिष्ठनिरवच्छिन्नाधिकरणताकत्वंवादलद्वयपर्यवसितार्थः। केचित्तुव्या

गा॰ दी॰ शि॰ ४९

भा

व्यवृत्तेर्हेतुसमानाधिकरणसाध्याभावस्येतिसमुदायस्यहेत्वधिकरणेव्याप्यवृत्तिर्यःसाध्याभावस्तस्येत्यर्थः।हेत्वधि
करणेव्याप्यवृत्तित्वंचहेत्वधिकरणीभूतयत्किंचिद्व्यक्तिनिष्ठाभावप्रतियोगितायाःसामानाधिकरण्येनानवच्छेद
कंयदभावनिष्ठंतद्व्यक्तित्वंतत्त्वंनचाविशिष्टसत्ताया जातेरित्यादौगुणादिनिष्ठसत्तादिरूपाभावप्रतियोगितया
विशिष्टसत्ताद्यभावस्यव्याप्यवृत्तित्वानुपपत्तिःयदभावायत्तावच्छिन्नानधिकरणत्वंहेतुमत्तत्त्वमितिविवक्षणा
व्यधिकरणधर्मावच्छिन्नाभावासंग्रहप्रसंगस्तदभावाप्रसिद्धेरितिवाच्यंयत्किंचिद्धेत्वधिकरणवृत्तितावच्छेदका
नुयोगितानिरूपकतानवच्छेदकंयदभावत्वंतत्त्वस्यविवक्षितत्वाद्गुणेगुणान्यत्वविशिष्टसत्ताभावोनास्तीतिप्रत्य
येनविशिष्टसत्ताभावत्वावच्छिन्ननिरूपितानुयोगिताविशिष्टायाःसत्तायागुणादिवृत्तित्वानभ्युपगमेन
विशिष्टसत्ताद्यभावस्यव्याप्यवृत्तितानिर्वाहादित्याहुः।ननुसंयोगिभिन्नंप्रमेयत्वादित्यत्रातिव्याप्तिःसंयोगि
भेदाभावस्यतद्भेदप्रतियोगितावच्छेदकीभूतसंयोगात्मकस्याव्याप्यवृत्तित्वेनलक्षणघटकत्वाभावाद्व्यधिक
रणधर्मावच्छिन्नाभावमादायलक्षणगमनादितिचेन्नसंयोगिभेदस्यव्याप्यवृत्तित्वेनतस्यद्रव्यत्वसंयोगप्रकारक
प्रमाविशेष्यत्वाद्यवच्छिन्नभेदसमनियततयातदभिन्नत्वेनतद्भेदप्रतियोगितावच्छेदकेद्रव्यत्वादिकमपिसंयोगिभेदा
भावःतस्यहेत्वधिकरणेव्याप्यवृत्तितयातत्प्रतियोगितावच्छेदकत्वस्यचसाध्यतावच्छेदकेसत्त्वेनातिव्याप्त्यनव
काशात्एवंद्रव्यान्यत्वविशिष्टसत्ताभाववान्द्रव्यत्वादित्यादौद्रव्यादौव्याप्यवृत्तेःसत्तारूपाभावस्यप्रतियोगिताव राम ४९

च्छेदकंसाध्यतावच्छेदकमित्यव्याप्तिरित्यपिनाशंकनीयंसत्तादिसत्त्वेपिद्रव्यादौद्रव्यान्यत्वविशिष्टसत्ताभावोनास्तीत्या
दिप्रत्ययानुदयात्विशिष्टनिरूपिताधिकरणताविशेषस्यैवविशिष्टाभावाभाववत्त्वोपगमाद्विशिष्टाभावस्यविशिष्टा
धिकरणताभावसमनियतत्वेनतदभिन्नतयाविशिष्टसत्ताधिकरणतायाअपिविशिष्टाभावप्रतियोगित्वात्।परंतु
संयोगत्वेनसंयोगनिरूपितायाअधिकरणतायाःकिंचिदवच्छिन्नत्वेपिसंयोगिभेदाभावत्वेनतन्निरूपिताधिकरण
तानिरवच्छिन्नैवद्रव्येसंयोगिभेदस्याप्रत्ययादवच्छेदकमन्तर्भाव्यैवतदभावत्वावच्छिन्नवत्ताप्रतीतेःएवंद्रव्यादौस
त्तात्वावच्छिन्नसत्ताद्यधिकरणतासत्त्वेपिद्रव्यान्यत्वविशिष्टसत्तात्वादिनैवतदवच्छिन्नप्रतियोगिताकाभावाभा
वत्त्वमपिनवृत्तिः।तत्रविशिष्टाभावोनास्तीतिप्रत्ययात्तथाचसाध्यनिष्ठयादृशप्रतियोगिताकाभाववत्त्वावच्छिन्ननिरू
पितानवच्छिन्नाधिकरणताहेत्वधिकरणवृत्तिस्तादृशप्रतियोगितानवच्छेदकत्वमेवसाध्यतावच्छेदकेनिवेश्यमि
तिनकश्चिद्दोषइत्याहुः।अथात्रहेत्वधिकरणवृत्तित्वंयदियेनकेनचित्संबंधेनतदाकालिकादिसंबंधेनध्वंसाधिक
रणवृत्तित्वविशिष्टत्वावच्छिन्नप्रभावादिकमादायाव्याप्तिःयदिचकालिकसंबंधेनकालेवृत्तित्वादेःहेतुमत्त्वमनधि
करणदेशावच्छिन्नैवेतिनियमात्सोऽहेत्वधिकरणेनिरवच्छिन्नवृत्तिकइतिमन्यतेतदापिसत्तावान्जातेरित्यादौहेतुमत्त्वेनाना
देशविषयितासंबंधेनवर्त्तमानेसाध्याभावमादायाव्याप्तिर्दुर्वारैवदैशिकविशेषणतासंबंधेनहेत्वधिकरणेवृत्तित्वनि
वेशनेचघटत्वाभावसाध्यकेव्यभिचारिण्यतिव्याप्तिःतत्रसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यसा

गा॰दी॰शि॰
५०

वरूपसाध्याभावस्य तेन संबंधेनाहृत्तेर्व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् एवं कालिकसंबंधावच्छिन्नप्र
तियोगिताकेऽत्राकाशाभावाभावे साध्ये आत्मत्वादिहेतावव्याप्तिः दैशिकविशेषणतया हेतुसमानाधिकरणस्याका
शाभावस्य प्रतियोगितावच्छेदकताया साध्यतावच्छेदकत्वात् कालिकसंबंधेनाकाशाभावरूपप्रतियोगिमत्ताया एव
कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभावेनास्तीति प्रत्ययनियामकत्वात् आकाशाभावरूपवत्ताबुद्धौ
साध्याभाववत्त्वेन बाधकाविरहादिति चेन्न स्वीयया बुद्धिप्रतियोगितान्वयवत्ताज्ञानं प्रति यादृशसंबंधेन स्वप्रकारके
ज्ञानं विरोधिता तादृशसंबंधेन हेतुव्यधिकरणवृत्तिर्योऽभावस्तदीयतादृशप्रतियोगितानवच्छेदकत्वस्यैव निवेशनीयत्वा
ज्ञानं विरोधिता तादृशसंबंधेन दर्शिताकाशाभावाभाववत्ताज्ञानविरोधिज्ञानविषयः अपि
तु आकाशाभावस्य दैशिकविशेषणतासंबंधेन सा वा तस्मिन्निवर्तते अत आकाशाभावीयसाध्यनिष्ठप्रतियोगिताया या
तु कालिकसंबंध एव न च तेन संबंधेनासावात्मनि वर्तते अपि तु व्यधिकरणधर्मावच्छिन्नसाध्याभावीयप्रतियोगितायाः एवंत
दृशप्रतियोगितेत्यनेनोपादानसंभवः अपि तु व्यधिकरणधर्मप्रकारेण साध्यवत्तावगाहिनं प्रति विरोधिता
दृशाभावज्ञानस्य दैशिकविशेषणतासंसर्गस्य व्यधिकरणधर्मप्रकारेण साध्यवत्तावगाहिनं प्रति दैशिकविशेषणतासंबंधेन आकाशत्वे
न सामान्यतः प्रतियोगिप्रकारकज्ञाननिवेशे आकाशप्रकारकज्ञानं प्रति दैशिकविशेषणतासंबंधेन प्रतियोगिताश्रयवत्ताज्ञा
नप्रकारकज्ञानस्य प्रतिबंधकत्वात् उक्तदोषतादवस्थ्यमिति यादृशप्रतियोगिताश्रयेत्युक्तप्रतियोगिताश्रयवत्ताज्ञा
नं च तत्प्रतियोगितावच्छेदकधर्मावच्छिन्नप्रकारकं ग्राह्यं तेनाकाशत्वेन तादृशसाध्यवत्ताज्ञानं प्रति दैशिकविशेष
राम
५०

णतया आकाशाभावप्रकारकज्ञानस्य विरोधित्वेऽपि न क्षतिः एवं च प्रतियोगिताश्रयावगाहित्वनिवेशप्रयोजनाभावा
त् यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिज्ञानं प्रति प्रतिबंधकमित्येव वक्तव्यं साध्यवत्ताज्ञानविरोधित्वं चैतल्ल
क्षणे निवेश्यं न च आकाशत्वादिना साध्यवत्ताज्ञानविरोधितामादाय दर्शितदोषतादवस्थ्यात् साध्यतावच्छेदकावच्छि
न्नप्रकारकज्ञानविरोधित्वपर्यन्तनिवेशे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभाववत्ताज्ञानस्य व्यधिकरण
धर्मादिप्रकारकसाध्यवत्ताज्ञानं प्रत्येव विरोधित्वेन साध्यतावच्छेदकावच्छिन्नप्रकारकज्ञानाविरोधितया तादृशसाध्या
भावाप्रसिद्धिरिति वाच्यं घटत्वविशिष्टवह्निमदित्यादिज्ञानस्यापि साध्यतावच्छेदकावच्छिन्नप्रकारतया अधिकमि
त्यादिन्यायेनाक्षतत्वात् न चैतन्मात्रावच्छिन्नप्रकारताकत्वमपि निवेश्यं अन्यथाकाशत्वनिरुक्तसाध्यतावच्छेद
कोभयरूपेण साध्यज्ञानं प्रति दैशिकविशेषणतयाकाशाभाववत्ताज्ञानस्य विरोधितया तद्दोषतादवस्थ्यमिति कथं व्य
धिकरणधर्मावच्छिन्नाभावसंग्रह इति वाच्यं प्रतियोगितावच्छेदकमात्रावच्छिन्नप्रकारतानिवेशेऽपि व्यधिकरणधर्मा
वच्छिन्नाभावासंग्रहात् तदवच्छिन्नप्रकारतामात्रनिवेशे उक्तस्थले आकाशाभावीयदैशिकविशेषणतावारणासंभ
वात् द्वितीयलक्षणे यादृशप्रतियोगितावच्छेदकयादृशप्रतियोगितासंबंधावच्छिन्नप्रकारतावच्छेदकातिरिक्तानव
च्छिन्नप्रकारताशालिज्ञानं प्रति येन संबंधेन स्वप्रकारकज्ञानं विरोधीति विवक्षणवदेतल्लक्षणे साध्यतावच्छेदकाप्य
वच्छिन्नप्रकारताशालिज्ञानं प्रति येन संबंधेन स्वप्रकारकज्ञानविरोधिताविवक्षणेन प्रतीकारसंभवात् आकाशत्वादिरू
पप्रतियोगितावच्छेदकातिरिक्तानवच्छिन्नप्रकारताकज्ञानविरोधिताविवक्षणेन

काशाभावाभावत्वादिरूपप्रतियोगितावच्छेदकातिरिक्ततयानवच्छिन्नप्रकारताकज्ञानविरोधितामादाय दोषसत्त्वा
त् हेतुसमानाधिकरणस्य व्याप्यवृत्तेर्वह्नित्वादिना घटाभावस्य प्रतियोगितावच्छेदकमेव वह्नित्वादिरूपं साध्यतावच्छेद
कमतः समवायेन धूमाभावस्य प्रतियोगि वह्नित्वेन घटाभावादेर्धूमत्वेन वह्न्यभावादेर्भिन्नतया तादृशाभावोपि साध्याभावए
व तथापि प्रतियोगितावच्छेदकभेदेनाभावभेदस्मतेनेदं लक्षणं सम्भवति नामानामिभेदापत्तिराशयेनाथवाग्रिमलक्षणं
अथवा हेतुसमानाधिकरणाभावीयसाध्यनिष्ठप्रतियोगितानवच्छेदकत्वं निवेश्यान्नदोषः वह्नित्वादिना घटाद्यभाव
स्य पटत्वादिना वह्न्याद्यभावाभिन्नत्वेपि तदीयघटादिनिष्ठप्रतियोगिताया एव व्यधिकरणवह्नित्वाद्यवच्छिन्नत्वेन वह्न्या
दिनिष्ठप्रतियोगितायां वह्नित्वादेरनवच्छेदकत्वात् प्रतियोगितासाध्यतावच्छेदकसंबंधावच्छिन्नत्वेन निवेशनीयात
न संबंधांतरावच्छिन्नप्रतियोगिताकसाध्याभावमादायनासंभवः व्यधिकरणधर्मावच्छिन्नप्रतियोगितायामपि संबंधा
वच्छिन्नत्वं स्वीकरणीयमिति तेनैव प्रतियोगितावच्छेदकत्वं च साध्यतावच्छेदकताघटकसंबंधावच्छिन्नं ग्राह्यं तेन गुण
वान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणस्य विषयितया गुणत्वादिमतः समवायेनाभावस्य ज्ञानानिष्ठप्रतियोगि
तावच्छेदकत्वेपि साध्यतावच्छेदकस्यन क्षतिः सर्वत्र द्वित्वावच्छिन्नप्रतियोगिताकसाध्याभावमादायैवैतल्लक्षणसम
न्वयसंभवात् व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेपि न क्षतिरिति केचित् व्यधिकरणधर्मावच्छिन्नाभावस्वरूपं मर्कटोत्तो
किंचित्करमतो लक्षणांतरमाह। हेतुसमानाधिकरणस्येति अत्र व्यधिकरणधर्मावच्छिन्नाभावस्याप्रामाणिकत्वे व्यधि

करणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमादाय याव्याप्तिवारणायोपात्तस्य सामानाधिकरण्येनेत्यस्यैव पर्याप्तलक्षणा
सामंजस्यमिति तादृशाभावस्वीकारे तु तत्संगच्छते अत्रापि हेतुसमानाधिकरणस्य व्याप्यवृत्तेरित्यस्य पूर्वोक्त एव पर्यवसितार्थः व्या
प्यत्वादिकमपि पूर्वोक्तमेव कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभाववानात्मत्वादित्यादावव्याप्तिवारणाय पू
र्वोक्तरीत्यनुसरणे गौरवाद्व्याप्यवृत्तित्वं परित्यज्य प्रतियोगिव्यधिकरणत्वेनाभावं विशेषयति प्रतियोगिव्यधिकरणस्येव
ति पूर्वलक्षणे साध्याभावस्य विशेष्यतोपादानात्तस्य च हेत्वधिकरणे साध्यरूपप्रतियोगिना सामानाधिकरण्यमावश्य
कमेवएकव्यक्तिवृत्तिसाध्यके तस्तत्र प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्ध्याव्याप्तिरिति तत्रोक्तं प्रतियोगिव्यधिक
रणत्वं च न प्रतियोग्यधिकरणवृत्तित्वं संयोगी सत्त्वादित्यादौ संयोगाद्यभावस्यात्यन्ताभावान्तरमादायातिव्याप्तेः
किंतु प्रतियोग्यनधिकरणवृत्तित्वं एवं च प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्तेरिति दलद्वयपर्यवसितार्थः प्रतियो
ग्यनधिकरणत्वं च साध्यतावच्छेदकसंबंधेन प्रतियोग्यधिकरणभिन्नत्वं अतः समवायेन ज्ञानादिसाध्यकद्रव्यत्वादि
हेतौ नातिव्याप्तिः इत्थं च प्रतियोगितानसंबंधविशेषावच्छिन्नत्वेन विशेषणीया विशेषणतावच्छेदकाभाव
साध्यके सर्वेपि वाभावस्य तेन संबंधेन किंचिद्विशिष्टस्याभावरूपप्रतियोगिसमानाधिकरणतया प्रतियोगिव्य
धिकरणाभावाप्रसिद्धिरतो यादृशप्रतियोगिताश्रयानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितायाः सामानाधिक
रण्येनानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यमिति सिद्धांतलक्षणे वक्ष्यमाणरीत्या निष्कर्षणी

मा०दी०२री
५२

यं अन्यविशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तेर्वारणाय यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं हेतुमत
इत्यस्यैव वाच्यतया न वह्निमान् धूमादित्यादौ वह्नित्वादिना घटाद्यभावीयप्रतियोगितायाः कृष्णघटकत्वांशं तदव
च्छेदकवह्नित्वावच्छिन्नानधिकरणत्वस्य हेतुमत्यसत्त्वात्तथा च सामानाधिकरण्येनेत्यनर्थकं अनवकाशितं यादृशप्रति
योगितावच्छेदकविशिष्टं यादृशप्रतियोगिताश्रयासत्त्वानधिकरणत्वं हेतुमत इत्येव तत्साध्यव्याप्तिलक्षणार्थे यद्
वह्नित्वाभावीयप्रतियोगितावच्छेदकवह्नित्वादिविशिष्टस्य हेतुमति सत्त्वेऽपि तादृशप्रतियोगिताश्रयघटादेरसत्त्वात्
हेतुसत्त्वानधिकरणत्वं हेतुमतोऽक्षतमेवेति तादृशप्रतियोगितावच्छेदकत्वमादाय दोषवारकतया सामानाधिकरण्ये
नेत्यस्य सार्थकता न वह्नित्वेन घटाद्यभावप्रतियोगितायाः वह्निभिन्नत्वनिरूपकत्वस्वीक्रियते नतु घटादिरूपप्रति
योगिभेदेन भिन्नाभावस्य प्रतियोगितावच्छेदकस्य चैक्यात् तथा च घटादिनिष्ठप्रतियोगिताश्रयसाधनादेरेव
साधनवति सत्त्वात् तादृशप्रतियोगिताश्रयानधिकरणत्वेन तत्रोक्तेन सामानाधिकरण्येनेत्यस्य सार्थकतासंभवः
प्रतियोगिभेदेन प्रतियोगिताभेदे तु महानसीयवह्न्यादिनिष्ठाया वह्न्यादिसामान्याभावीयप्रतियोगितायाः पर्वते
यवह्न्याद्यवृत्तित्वात् तादृशप्रतियोगिताश्रयानधिकरणत्वस्य हेतुमति पर्वतादौ सत्त्वात् वह्नित्वादेस्तदवच्छेदक
त्वमादाय व्याप्तेरिति वाच्यं यतः प्रतियोगिभेदेन न प्रतियोगिताभेदः अपि त्ववच्छेदकभेदेनैव एवमपि च वह्निभि
भवान् घटादित्यादौ वह्निभिन्नत्वेन वह्न्यभावीयप्रतियोगितायाः वह्निभिन्ने सत्त्वात् तादृशाश्रयानधिकरणत्वस्य

राम
५२

वह्निभिन्नत्वे हेतुमत्त्वसत्त्वं यत्तादृशप्रतियोगितावच्छेदकत्वमादाय व्याप्तेर्वारकतया सामानाधिकरण्येनेत्यस्य सार्थक्यं
महाकालो घटवान् कालपरिमाणादित्यादौ महाकालान्यत्वविशिष्टप्रतियोगितैव तादृशी महाकालस्य तदवच्छे
दकमहाकालान्यत्वविशिष्टघटत्वाद्यवच्छिन्नाधिकरणतासत्त्वात् अथ वा वक्ष्यमाणरीत्या साध्यतावच्छेदक
संबंधसामान्ये यादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वं यादृशप्रतियोगिताश्रयप्रतियोगिकत्वं हेत्वधि
करणीभूतयत्किंचित्प्रतियोगिकत्वे तन्निरूपितावच्छिन्नाभावस्तदनवच्छेदकत्वमेव वाच्यं एवं च तत्राव्याप्तिप्रसंगेनाघ
सावप्रतियोगितैव तादृशी एवं च वह्नित्वादिना घटाद्यभावप्रतियोगितावच्छेदकवह्नित्वविशिष्टप्रतियोगिताकत्वतदा
क
श्रयवह्निभिन्नप्रतियोगिकत्वयोरेकस्मिन् संबंधेऽसत्त्वेन तादृशप्रतियोगितायाः पितथात्वात् तद्वारकतयापि सामानाधि
करण्येनेत्यस्य साफल्यमव्यवसेयमित्याहुः परे तु अत्यन्ताभावस्येवान्योन्याभावस्यापि प्रतियोग्यवृत्तिधर्मावच्छिन्न
प्रतियोगिताकत्वोपगमात् पर्वतादौ वह्नित्वविशिष्टघटावच्छिन्नभेदादिमङ्गेऽपि प्रामाणिकः एवं च स्वावच्छेदकवि
शिष्टावच्छिन्नस्वाश्रयविशिष्टप्रतियोगिताकभेदवद्वृत्त्यधिकरणं यत्प्रतियोगित्वं तदनवच्छेदकत्वं साध्यतावच्छेद
कस्य निवेशनीयं एवं च वह्नित्वादिना जलघटाद्यभावीयप्रतियोगितापि तादृशी स्वं च कथितप्रतिस्वत्वस्यावच्छेदकं वह्नित्वादिवि
शिष्टावच्छिन्नतदाश्रयजलादिमद्भिन्नप्रतियोगिताकत्वात् अतस्तदवच्छेदकतामादाय दोषवारणाय सामानाधि
करण्येनेति संयोगी द्रव्यत्वात् वह्निमान् धूमादित्यादौ संयोगत्ववह्नित्वाद्यवच्छिन्नसंयोगघटाद्यभावप्रतियोगितायाः

गा॰ दी॰ शि॰ ५३

संयोगत्वाद्यवच्छिन्नगुणत्वहृदादिनिष्ठगुणत्वहृदत्वाद्यवच्छिन्नसंयोगिपर्वतभेदस्य चादायतथात्ववारणाय निष्ठान्तावच्छि
न्नतयोरुपादानं अथवा याद्दृशप्रतियोगितावच्छेदकावच्छिन्नयाद्दृशप्रतियोगिताश्रयवृत्तिप्रतियोगितावच्छेदकता
कभेदवत्त्वं हेतुमत्तदनवच्छेदकत्वं विवक्षणीयं वह्नित्वादिना घटाद्यभावप्रतियोगिताप्येताद्दृशी ताद्दृशप्रतियो
गितावच्छेदकवह्नित्वाद्यवच्छिन्नताद्दृशप्रतियोगितासमानाधिकरणप्रतियोगितावच्छेदकताकस्य वह्नित्वेन घटत्वा
भेतिप्रतीतिविषयभेदस्य हेतुमतिसत्वात् व्यधिकरणधर्मस्यात्यन्ताभावप्रतियोगितावच्छेदकत्ववदन्योन्याभा
वप्रतियोगितावच्छेदकतायामप्यवच्छेदकत्वात् अत एव समवायित्वया वा व्यक्तिविच्छेदोपि द्रव्यवृत्तिमिश्रैरमिहितं
द्रव्यं च ताद्दृशप्रतियोगितावारणाय सामानाधिकरण्येनेति हेतुमतो वह्नित्वेन घटवद्भेदवत्त्वं घटत्वेन वह्निम
द्भेदवत्त्वं चादाय वह्नित्वाद्यवच्छिन्नवह्निनिष्ठप्रतियोगितायास्ताद्दृशत्ववारणाय प्रकृतप्रतियोगितासमानाधि
करणत्वं तदवच्छेदकावच्छिन्नत्वयोः तदप्रतियोगितावच्छेदकतायां निवेशनं महाकालो घटवान् कालपरिमा
णादित्यादौ महाकालान्यत्वविशिष्टघटाद्यभावीयप्रतियोगितामादायैव लक्षणसमन्वयः ~~[illegible]~~ गगनत्वपटत्वा
द्यवच्छिन्नपटादिनाघटाद्यभावीयप्रतियोगिता ~~[illegible]~~ ~~[illegible]~~ गगनत्वपटत्वाद्यवच्छिन्नपट
~~[illegible]~~ भवेपि सामानाधिकरण्येन तदवच्छेदकस्याप्रसिद्धेः अथवा ताद्दृशप्रतियो
~~[illegible]~~ सामानाधिकरण्यविशिष्टयद्धर्मावच्छेद्यसाभावस्तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरित्येव
गितासामान्ये यद्धर्मसामानाधिकरण्यविशिष्टयद्धर्मावच्छेद्यसाभावस्तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरित्येव

प्रतियोगितावच्छेदकतावच्छेदकतया महाकालान्यत्वविशिष्टेऽधिकरणे

राम
५३

विवक्षणीयं एवं च व्यधिकरणधर्मावच्छिन्नप्रतियोगितामादायापि लक्षणसमन्वयस्तत्रासंभवतीत्यवधेयं। वह्नित्वेन
वह्निर्धूमाभावेनास्तीत्येताद्दृशप्रतीतिविषयाभावस्य वह्निमान् वह्नित्वेन वह्निर्धूमोभयं वान्नेति प्रतीतिसिद्धभेदमादाय
प्रतियोगिव्यधिकरणत्वेपि तस्य प्रतियोगितावच्छेदकत्वं न वह्नित्वमात्रेपर्याप्तं तथा सति वह्नित्वरूपप्रतियोगितावच्छे
दकविशिष्टवह्निरूपप्रतियोगिमतिताद्दृशाभावप्रत्ययप्रसंगात् किंतु वह्नित्वतदुभयत्वयोरेव तस्य पर्याप्तिरतस्ताद्दृश
प्रतियोगितायासमानाधिकरणतयावच्छेदकत्वेपि वह्नित्वस्य न क्षतिः यदि च ताद्दृशाभावप्रतियोगितावच्छेदकं व
ह्नित्वादिकमेव न तु प्रतियोगिविशेषणतानापन्नमुभयत्वं प्रतियोगिविशेषणतानापन्नप्रतियोगितावच्छेदकत्वावगा
हिप्रतीत्यात द्विशेषणतापन्नेतदनवगाहनात् अन्यथा वह्नित्वेन घटो नास्तीत्यादावपि वह्नित्वघटत्वोभयस्यावच्छेदक
त्वपर्याप्त्यवगाहनौचित्यात् सामानाधिकरण्येनेत्यस्य वैयर्थ्यापत्तेः। वह्नित्वेनोभयाभावप्रतियोगिता च व्यासज्य
वृत्तिरतो न ताद्दृशाभावस्य केवलान्वयित्वानुपपत्तिरिति मन्यते तदा सामानाधिकरण्येनेत्यस्य प्रतियोगितापर्या
प्त्यधिकरणवृत्तित्वेनेत्यर्थ इत्याहुः तदुभयमपि न युक्तं एवं सति घटत्वादिना साध्याभावप्रतियोगितायामपि निरुक्त
प्रतियोगिवैयधिकरण्यनिरूपकत्वसत्त्वेन प्रथमलक्षणे वैयधिकरण्याभिधानस्य निर्बीजतया संदर्भविरोधा
पत्तेः तस्मात् ताद्दृशप्रतियोगितासंबंधावच्छिन्नप्रकारतावच्छेदकं यत्किंचिद्धर्मावच्छिन्नानधिकरणत्वं हेतुमत
त्तदनवच्छेदकत्वं साध्यतावच्छेदकस्य विवक्षणीयं कपिसंयोगत्वाद्यवच्छिन्नकपिसंयोगादिनिष्ठप्रतियोगि

गा. टी. शि.
५४

तासंसर्गावच्छिन्नप्रकारतावच्छेदकं कपिसंयोगत्वादिकमेव तदवच्छिन्नानधिकरणत्वं च हेतुमत्यवृत्ति न कपिसंयोगी एत
द्वृक्षत्वादित्यादावव्याप्तिः घटत्वावच्छिन्नप्रतियोगिकत्वसंबंधेन च प्रमेयत्वादिना प्रतियोगिनो घटत्वेन प्रमेयं नास्तीत्या
दिज्ञाने भानात् प्रमेयत्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमत्यसंभवात् घटत्वाद्यवच्छिन्नप्रतियोगितायां यादृशप्रति
योगितात्वेनोपादानासंभवात् तथाविधप्रतियोगितायाः प्रसिद्धिरतो यत्किंचिद्[?] दंडिमान् दंडिसंयोगादित्यादौ
तत्तद्दंडावच्छिन्नानधिकरणत्वमादाय दंडिसामान्याभावस्य प्रतियोगिवैयधिकरण्येपि न क्षतिः तत्तद्दंडावच्छिन्नात्यं
ताभावप्रतियोगितावच्छेदकत्वमादाय दोषवारणासंभवात् तत्र परंपरासंबंधेन दंडत्वादेः साध्यतावच्छेदकत्वस्वीकारस्याव
श्यकत्वात्[?] विशिष्टप्रतियोगिविषयकाभावज्ञाने संयोगत्ववृत्तित्वादिरूपसामान्यधर्मावच्छि
प्रसक्तत्वात् तत्संयोगत्वत्ववृत्तित्वादिविशिष्टप्रतियोगिविषयकाभावज्ञाने संयोगत्ववृत्तित्वादिरूपसामान्यधर्मावच्छि
न्नप्रतियोगितायाः संसर्गतया भानेनाभावात् तत्संयोगत्वत्ववृत्तित्वाद्यवच्छिन्नानधिकरणत्वेपि हेतुमतो न क्षतिः।
संयोगत्ववृत्तित्वाद्यवच्छिन्नप्रतियोगितायाः घटत्वाद्यवच्छिन्नत्वेन घटो नास्तीत्यभावबुद्धेः संसर्गतया भानोपगमे
त्वमानिरूपितत्वेन प्रकारताविशेषणीया विशिष्टसत्तावान् जातिरित्यादौ विशिष्टसत्तात्वाद्यवच्छिन्नानधिकरणत्वस्य प्रति
योगितासंबंधाद्यवच्छिन्नप्रकारतावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमति सत्त्वादतिव्याप्तिः च
वृत्तित्वाद्यवच्छिन्नघटादिनिष्ठव्यधिकरणधर्मावच्छिन्नाभावीयप्रतियोगितासंबंधावच्छिन्नप्रकारतावच्छेदकघटत्वाद्य
वच्छिन्नानधिकरणत्वस्य हेतुमति सत्त्वात् सामानाधिकरण्येनेत्यस्य सार्थकता एकमात्रवृत्तिसाध्यकस्थले साध्या

राम
५४

त्प्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकावच्छिन्नानधिकरणत्वं न हेतुमद्वृत्ति साध्यवृत्ति तथाविधप्रतियोगिताया
प्रसिद्ध्या न पूर्वोक्तलक्षणप्रतियोगिव्यधिकरणत्वं निवेशितं वह्नित्वादिना उभयाभावमादाय दोषस्तु पूर्ववद्[?]वारणी
यवृत्ति परे तु यदि घटत्वेन वह्निर्नास्ति वह्नित्वेन घटो नास्तीत्यादौ वह्नित्वघटत्वादिरूपसमानाधिकरणधर्मस्यापि प्र ६९
तियोगितावच्छेदकत्वं भासते अन्यथा तादृशप्रतीतेः प्रतियोगिनि तत्तद्धर्माणामुपलक्षणतया भानेन तद्विशिष्टप्रति
स्यानवगाहितया तन्निर्विकल्पकानंतरमप्युत्पत्त्यापत्तेः न च वह्नित्वघटत्वादेः प्रतियोगितावच्छेदकत्वानवगाह
नेतन्निर्विकल्पकानंतरं तादृशाभावबुद्धिरिष्टैव प्रतियोगितावच्छेदकतया पूर्वं भासनेन तन्निर्विकल्पकानंतरमेवा घटत्वेन वह्नित्वेन नास्तीति
भावप्रतीत्युपगमादिति वाच्यं वह्नित्वादिनिर्विकल्पकानंतरं तथाविधप्रत्ययोपगमे विशेषाभावेन तदुत्तरं वह्नित्वा
यत्र प्रतियोगितावच्छेदकत्वानवगाहि वह्निर्नास्तीत्याकारकसमानाधिकरणधर्मावच्छिन्नाभावप्रत्ययस्यापि
स्वीकारापत्तेरित्युक्तं तदसत् व्याप्यवृत्तितानिवेशपक्षे वह्नित्वादेर्व्याप्यवृत्तित्वे घटत्वाद्यवच्छिन्नवृत्त्यभावप्रतियो
गितावच्छेदकत्वमादायासंभवप्रसक्तिरित्यालोच्य प्रतियोगिवैयधिकरण्यनिवेशनमनुससार तदर्थः प्रतियो
गितावच्छेदकविशिष्टानधिकरणवृत्तित्वमेव तथा सत्यपि हेतुमतो घटत्वादिविशिष्टानधिकरणत्वात् तथा वह्नित्वादि
गितावच्छेदकविशिष्टानधिकरणवृत्तित्वमेव तथा सत्यपि... सामानाधिकरण्येनेत्यस्य सार्थक्यसंभवात् न च प्रतियोगितावच्छेदकविशि
नाघटाद्यभावमादाय दोषप्रसक्त्या सामानाधिकरण्येनेत्यस्य सार्थक्यसंभवात्
त्वानधिकरणत्वं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकताकभेदवत्त्वं तथा च संयोगत्वाद्यवच्छिन्न

गा॰ दी॰ शि॰
५५

घटादिमद्भेदमादायसंयोगसंसर्गाभावस्य प्रतियोगिवैयधिकरण्यापत्तेः भेदप्रतियोगितावच्छेदकतायांप्र
कृतप्रतियोगितासामानाधिकरण्यनिवेशनेनचपरोक्तत्यादिनाभिहितद्वितीयकल्पएवपर्यवसानमिति। घटत्वादिना
घटाद्यभावस्यापिप्रतियोगिवैयधिकरण्यापत्त्यावह्नित्वादेस्तत्प्रतियोगितायाः सामानाधिकरण्येनावच्छेदकतया
व्याप्तिरितिवाच्यं व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकभेदानभ्युपगमेनेवोक्तापत्त्यसंभवात् घटत्वेनप
टत्वाभेत्याद्येघटत्वाद्यवच्छिन्नपटाद्यत्यन्ताभावस्यैवविषयत्वोपगमात् प्रतियोगितावच्छेदकंसामानाधिकरण्येनयत्रा
वच्छेदकंतादृशप्रतियोगितावच्छेदकताकएववाभेदोनिवेश्यः। अथैवमपिघटत्वाद्यवच्छिन्नवह्न्याद्यभावस्यघट
त्वाद्यवच्छिन्नघटादिव्यधिकरणस्यप्रतियोगितावच्छेदकत्वमादायाव्याप्तिर्दुर्वारैवेतिचेन्नसामानाधिकरण्येनप्र
तियोगितायामवच्छेदकंयद्यदवच्छिन्नतत्समानाधिकरणप्रतियोगितावच्छेदकताकभेदस्यैवनिवेशनीयत्वात् अ
वह्नित्वादिनाघटाद्यभावस्ययदिघटत्वादिकंप्रतियोगितावच्छेदकंतदाघटादिमतितादृशाभावसत्त्वप्रसंगइति
वह्नित्वघटत्वाद्योरेवावच्छेदकतापर्याप्तिरुपगंतव्या तथाचानवच्छेदकपदस्यावच्छेदकतापर्याप्त्यनधिकरणपरत
याव्याख्येयतयैवतादृशाभावप्रतियोगितामादायदोषाप्रसक्तेः सामानाधिकरण्येनेत्यस्यवैयर्थ्यमप्यवारणी
यमेवेतिचेन्न प्रतियोगिविशेष्यतायाभेदेनापभयोर्वच्छेदकतावैलक्षण्येनप्रत्येकमेवाव च्छेदकतापर्याप्तेः पर्या
प्तिविवक्षामात्रेणाप्रतीकारासंभवात् सामानाधिकरण्येनेत्यस्यसार्थक्यं तदपिप्रतियोगिविशेषणतापन्नस्ययादृशं

राम
५५

विलक्षणमवच्छेदकत्वंतत्पर्याप्त्यनधिकरणत्वलाभायैवव्यधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावस्यैवतत्प्रतियोगि
तावच्छेदकविशिष्टविरोधित्वोपगमेनोक्ताभावस्यघटादिमतिवृत्तेर्बाधकाभावात् अस्तुवाविलक्षणावच्छेदकतातेनप्र
त्येकंपर्याप्तयोरप्यवच्छेदकत्वयोस्तत्तत्प्रतियोगितावच्छेदकत्वेनानुगतयोः समानाधिकरणधर्मव्यधिकरणधर्मभे
देपर्याप्त्यंतरंतादृशानुगतरूपावच्छिन्नपर्याप्त्यधिकरणधर्मावच्छिन्नस्यैवाभावविरोधित्वेति। व्यधिकरणधर्मावच्छिन्ना
भावस्यप्रतियोगिमतिसत्त्वोपपत्तिः एवंचवह्नित्ववह्नित्वोभयावच्छिन्नवह्न्यभावमादायपर्याप्तिनिवेशाव्याहतिप्रदर्शनं
समानाधिकरणधर्मस्यव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्रतियोगितानवच्छेदकत्वपक्षीयव्याप्यवृत्ति
त्वघटितलक्षणाभिप्रायेणेतिपदंति अव्यभिचारिसंबंधरूपतावच्छेदकस्याव्यभिचारिसंबंधरूपपदप्रतिपा
द्यतातथाचसर्वैवमेतत्पदस्यपारिभाषिकतेतिभावः। ननुसाध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वरूपस्यव्य
भिचारपदार्थस्यतत्र शरीरेऽनिवेशात्कथमेवमित्यतआह हेत्वाधिकरणेति हेत्वन्वयिसाध्यतावच्छेदकावच्छिन्नसाध्या पृ॰ भा
भाववद्वृत्तित्वंव्यभिचारः तथासाध्यतावच्छेदकान्वयिनोहेतुसमानाधिकरणाभावप्रतियोगितायांसामानाधिकर
ण्येनावच्छेदकत्वस्यापितथात्वादित्यर्थः वह्निर्धूमस्यव्यभिचारीइत्यत्राभाववद्वृत्तित्वंव्यभिचारपदार्थः तदेकदेशेअभावे
धूमपदार्थप्रतियोगितायांनिरूपकत्वसंबंधेनान्वयः प्रतियोगितायांचाधेयतासंबंधेनधूमस्यावच्छिन्नत्वसंबंधेनधर्म
विशेषणतापन्नधूमत्वस्यान्वयइतिधूमत्वावच्छिन्नधूमाभाववद्वृत्तित्वलाभः साध्यतावच्छेदकावच्छिन्नसाध्यांतर्भा

तेनन व्यभिचारपदार्थताश्रयानंत्यप्रसंगात् साध्यवाचकपदवैयर्थ्यापाताच्च एवं समानाधिकरणाभावप्रतियोगितायां
सामानाधिकरण्येनावच्छेदकत्वं व्यभिचारपदार्थः सामानाधिकरण्ये च समुत्पत्तिवैशिष्ट्यात् प्रथमांतपदोपस्थाप्यस्यापि
वह्न्यादेर्निरूपकत्वेनान्वयः धूमाद्यंतर्भावेन च वाक्यार्थः धूमपदं लक्षणया धूमत्वपरं आधेयत्वं षष्ठ्यर्थः अन्वयश्चा
स्यावच्छेदकत्वे निरूपकत्वमिन्द्रस्यार्थः तथाच धूमत्वनिष्ठस्वसमानाधिकरणाभावप्रतियोगितावच्छेदकतानि
रूपको वह्निरित्यन्वयबोधः यद्यपि लाघवरूपविनिगमकसत्वात् तदभाववद्वृत्तित्वमेव व्यभिचारपदशक्तिकल्प्यनमु
चितं तथापि शेयत्वं व्यभिचारीति प्रामाणिकव्यवहारानुरोधादुपदर्शितगुरुरूपस्यापि व्यभिचारप
दार्थत्वमावश्यकं तत्र वाच्यत्वाभावाप्रसिद्धात् तदभाववद्वृत्तित्वाभावबोधासंभवात् उक्तरूपस्य व्यभिचारपदार्थत्वे व्य
भिचारस्याभावो व्यभिचार इत्यव्ययीभावाश्रयणात् ज्ञेयत्वे समानाधिकरणाभावप्रतियोगितानवच्छेदकत्वं व्य
भिचारपदार्थः इत्यस्यार्थो निरूपकत्वं वाच्यत्वपदं वाच्यत्वपरं षष्ठ्यर्थश्चाधेयत्वं तथाच वाच्यत्वनिष्ठस्वस
मानाधिकरणाभावप्रतियोगितानवच्छेदकतानिरूपकं ज्ञेयत्वमित्यन्वयबोधः अथैवमपि अव्यभिचारिसंबंधप
देनोक्तव्याप्तेः कथं लाभः नवाव्यभिचारिपदं तादृशप्रतियोगितानवच्छेदकत्वाश्रयपरं संबंधश्च तदाश्रयसामानाधि
करण्यमितितत्लाभ इति वाच्यं वह्नित्वे धूमाव्यभिचारीति प्रयोगाभावात् उक्तधर्मबोधकाव्यभिचारिपदसमभिव्या
हृतमत्वर्थस्याश्रयत्वाबोधकत्वात् अव्यभिचारिपदार्थान्वयितावच्छेदकं यद्रूपं तद्वच्छिन्नसमानाधिकरणाभा

वप्रतियोगितानवच्छेदकत्वबोधकतायाव्युत्पत्तिसिद्धत्वात् साध्यतावच्छेदकस्याव्यभिचारिपदार्थत्वे हेतुसमानाधिकर
णेत्यादिव्याप्तिबोधस्याशक्यत्वाच्चेति चेन्न अव्यभिचारिसंबंधपदस्याव्यभिचारि हेतुभिन्नसाध्यसामानाधिकरण्य
मित्यर्थः एवं च साध्यतावच्छेदकनिष्ठस्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकतानिरूपकहेतुनिष्ठसाध्यसा
मानाधिकरण्यमिति पर्यवसितं उक्तलक्षणस्याप्ययमेवार्थो नास्य नतु यथाश्रुतविशेष्यविशेषणभावेतदापभ्रस्या
व्यभिचारिसंबंधपदेन बोधयितुमशक्यतया पारिभाषिकतायादुर्वारत्वात् न च यद्रूपावच्छिन्नस्य यस्य व्याप्तित्वं तद्
रूपेण तस्याव्यभिचारिसंबंधपदार्थत्वेपि न क्षतिरिति वाच्यं एवं सति साध्याभाववद्वृत्तित्वमात्रस्य व्यभिचारपदार्थत्वे
पि व्यतिरेकिसाध्यकाव्याप्तेरव्यभिचारिसंबंधरूपतोपपत्तेरुक्तधर्मस्य व्यभिचारिपदार्थत्वव्यवस्थापनानुपयुक्तत्वा
त् उक्तलक्षणेपि साध्यसामानाधिकरण्यमंतर्भाव्याव्यभिचारिसंबंधरूपताया व्यवस्थापयितुं शक्यत्वात् साध्यसामा
नाधिकरण्यानंतर्भावेपि प्रतियोगिसमानाधिकरणस्वसमानाधिकरणाभावकत्वरूपपर्यवसितरूपलक्षणार्थ
स्य संबंधरूपतासंभवात् अवच्छेदकत्वमिति अनवच्छेदकमित्यत्र यदवच्छेदकपदं तत्तात्पर्यविषयावच्छेदकत्वमित्यर्थः
तत्पर्याप्त्यधिकरणत्वं पर्याप्तिसंबंधेनावच्छेदकतावत्त्वं तथाच पर्याप्तिसंबंधेनावच्छेदकतावच्छिन्नस्य भेदो नवच्छेदक
पदेन विवक्षित इति भावः विशिष्टधूमाभावस्य प्रतियोगितावच्छेदकत्वेपि वह्नित्वस्येत्यन्वयः महानसीयत्वादिवि
शिष्टधूमत्वाभावस्य प्रतियोगितायां महानसीयत्वसहितस्य वह्नित्वस्यावच्छेदकत्वेपि आश्रयत्वसंबंधेनावच्छेदकता ॥ ई

वदन्यतस्यवृत्तित्वे दुर्लभत्वादिति भावः। प्रतियोगिविशेषणतापन्नधर्मांतरसहितवृत्तित्वावच्छिन्नाभावमादायदोषं
दर्शयितुं प्रतियोगिविशेषणतापन्नधर्मस्यैव प्रतियोगितावच्छेदकत्वं प्रतीयते इति नियमानभ्युपगंतुर्व्यधिकरण
धर्मावच्छिन्नाभाववादिनः प्रतियोग्यवृत्तिधर्मसहितप्रतियोगिवृत्तिधर्मपर्याप्तप्रतियोगितावच्छेदकताकोभावो
वृत्तीति मतेनाह तादृशाभावमादायापि दूषणं दर्शयति हृदत्वेति उभयावच्छिन्नाभावप्रतियोगितावच्छेदकोभय
घटकप्रत्येकस्यावच्छेदकताया अव्याहतत्वादिति भावः। नन्वेतेरिति अवच्छेद्याश्रयविशेषणतापन्नेषु तदना
पन्नेषु च नानाधर्मेषु पर्याप्तिमत्वम् अवच्छेदकत्वं पर्याप्तिसंबंधेन तदवच्छिन्नस्य भेदस्य तत्पर्याप्त्यनवच्छेदक प्रत्ये
कधर्ममात्रवृत्तिधर्मावच्छेदेन सत्त्वाद्वह्नित्वादेस्तादृशप्रतियोगितानवच्छेदकत्वस्य पटत्वाघवच्छिन्ने घटपटोभय
त्वाघवच्छिन्नभेदवत्त्रिप्रसत्त्वादिति भावः। ननु वह्निनिष्ठहृदत्ववह्नित्वोभयावच्छिन्नप्रतियोगितायाः सामाना
धिकरण्येनाऽवच्छेदकत्वं तद्वह्नि समानेऽपर्याप्तिं हृदत्वस्य व्यधिकरणतयैवावच्छेदकत्वात् इति कथं वह्नित्वस्य ता
दृशावच्छेदकत्वावच्छिन्नान्यत्वनिर्वाहः इति चेत् यतः सामानाधिकरण्येनानवच्छेदकत्वमित्यस्य तत्प्रतियोगि
तासामानाधिकरण्यवृत्ति यत्तत्प्रतियोगितावच्छेदकत्वं तदवच्छिन्नभेदकूटवत्त्वमित्यर्थः हृदत्वं च हृदत्ववह्नित्वोभ
यावच्छिन्नप्रतियोगितायाः समानाधिकरणवृत्त्यैवावच्छेदकत्वमुभयपर्याप्तं तदवच्छिन्नभेदो वह्नित्वे अव्याह
तमेव। नतु संयोगादि साध्यकसद्धेताव्याप्तिवारणाय तदभावव्यावर्तके व्याप्यवृत्तित्वादिविशेषणोपादानेन साध्य

कसत्त्वादि रूपव्यभिचारिहेतावतिव्याप्तिप्रसंगः अभावांतरस्यैव लक्षणघटकत्वादित्याशंकां व्यभिचारिहेतुकस्थले संयो
गाघभावस्य लक्षणघटकत्वप्रदर्शनेन परिहरति सत्तावतीति व्याप्यवृत्तिरित्युक्तलक्षणं प्रतियोगिव्यधिकरणाभावस्य
पि बोध्यं अयं भावः व्याप्यवृत्तित्वमत्र नावच्छिन्नवृत्तिकान्यत्वं न वा स्वसमानाधिकरणाभावप्रतियोगित्वसामान्या
भावः प्रतियोगिव्यधिकरणत्वं च न प्रतियोग्यधिकरणावृत्तित्वं किंतु अनवच्छिन्नवृत्तिकत्वं स्वाधिकरणयत्किंचिद्
वृत्तिनिष्ठाभावाप्रतियोगित्वं वा व्याप्यवृत्तित्वं प्रतियोग्यनधिकरणवृत्तित्वं च प्रतियोगिवैयधिकरण्यं संयोगाघभावसा
धारणं हेत्वधिकरणे तथात्वस्य विवक्षितत्वात् सद्धेतुस्थले न तादृशाभावस्य लक्षणघटकता तत्र गुणादेर्हेत्वनधिकरण
त्वात् सत्त्वादिहेतुकस्थले तु तस्य हेत्वधिकरणतया तत्र व्याप्यवृत्तिः प्रतियोगिव्यधिकरणश्च साध्याभावो लक्षणघटक ए
वेति वक्ष्यमाणमिति सिद्धांतलक्षणमित्यादिः तदवच्छेदकत्वं प्रतियोगितावच्छेदकत्वं तदपि एतल्लक्षणेऽपि बोध्यं वि
वक्षणीयं अन्यथा लघुरूपसमनियतगुरुधर्मावच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्तेरिति भावः तथा च संयो
गादिरूपसाध्याभावस्य व्याप्यवृत्तित्वादिरूपविशेषणेन व्यावर्तनेऽपि न क्षतिः व्याप्यवृत्त्यभावांतरप्रतियोगिताव
च्छेदकानतिरिक्तवृत्तित्वस्य संयोगत्वादौ सत्त्वेन तदवच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्त्यप्रसक्तेरिति यथाश्रु
ताशयो वगम्यते स च न संगच्छते सत्ता वा आतेरित्यादौ सत्तात्वस्य हेतुसमानाधिकरणाभावप्रतियोगितावच्छेद
कविशिष्टसत्ताव्यक्त्यनतिरिक्तवृत्तितया सत्तात्वसाधारण्यात् तया अव्याप्तेर्वारणाय स्वविशिष्टसंबंधिनिष्ठाभावप्रतियो

गितानवच्छेदकतत्कसंसर्गतदन्यतिरिक्तवृत्तित्वस्यैवविवक्षणीयतयातद्घटकाभावव्याप्यवृत्तित्वनिवेशप्रयोजनविरहे
णसंयोगादिसाध्यकसद्धेतौहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकसंयोगत्वादेर्निरुक्तान्यतिरिक्तवृत्तित्व
स्यसंयोगत्वादिसाधारण्यविरहेणाव्याप्त्यनवकाशेनहेतुसमानाधिकरणाभावव्याप्यवृत्तित्वनिवेशनैयत्यस्यैत
न्नवच्चविशिष्टसंबंधिनिष्ठाभावव्याप्यवृत्तित्वविशेषणाद्द्रानसंयोगेनद्रव्यस्याव्याप्यवृत्तितापक्षेसंयोगेनसा
ध्यतायांहेतुसमानाधिकरणसाध्यतावच्छेदकसंबंधावच्छिन्नाभावप्रतियोगितावच्छेदकंयद्विशिष्टसंबंधिनिष्ठाभा
वीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकंतादृशधर्मप्रसिद्धिस्तादृशाभावप्रतियोगितावच्छेद
कीभूतसकलधर्मावच्छिन्नानामेकसंयोगेनाभावानांकेवलान्वयित्वादितिरुचविशिष्टसंबंधिनिष्ठाभावव्याप्यवृ
त्तित्वविशेषणस्यावश्यकतेतिवाच्यंसंयोगाद्यभावव्यावर्तकस्यावच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वस्य
निवेशनेसंयोगेनसाध्यतायांहेतुसमानाधिकरणसाध्यतावच्छेदकसंबंधावच्छिन्नाभावोगुणादीनामेवव्याप्य
वृत्तिर्नतुद्रव्यस्येतितादृशाभावप्रतियोगितावच्छेदकंयद्विशिष्टसंबंधिनिष्ठतादृशाभावप्रतियोगितानवच्छेदकं
तादृशधर्मप्रसिद्धितादवस्थ्यात्प्रतियोगितायाःसाध्यतावच्छेदकसंबंधावच्छिन्नत्वंपरित्यज्यएकसंबंधावच्छि सन्नबोधेन पदापृथा
न्नत्वस्यविशेषणताविशेषावच्छिन्नत्वस्यवाविशेषणत्वपक्षस्यैवावलंबनीयतयाव्याप्यवृत्तित्वविशेषणवैयर्थ्य वरस्यभागदर्न
स्यगुरुद्धरत्वात्तस्माद्वक्ष्यमाणंवेतिग्रंथस्यअभावेव्याप्यवृत्तित्वविशेषणंनदेयमेवतद्दानेपिसंयोगत्वादेर्द्रव्य

त्वसमानाधिकरणाभावप्रतियोगित्वीयपारिभाषिकावच्छेदकत्वविरहेणाव्याप्त्यप्रसक्तेरित्याशयःतत्रचपारिभाषिकावच्छेद
कत्वशरीरेनिविष्टस्यविशिष्टसंबंधिनिष्ठाभावव्याप्यवृत्तित्वविशेषणमावश्यकंअन्यथातुल्ययुक्त्याभावत्तादिहेतुकेपि
संयोगत्वादेपारिभाषिकावच्छेदकत्वानिर्वाहादितिहेतुमन्निष्ठाभावेपिनद्विशेषणमावश्यकमन्यथाव्याप्तेरित्याशंक्यं
सत्त्वादिहेतुकस्थलेगुणत्वाद्यवच्छिन्नाभावप्रतियोगितायाःपारिभाषिकावच्छेदकंसंयोगत्वादेरप्रसक्तस्यैवारमति
सबतिचेतिगुणत्वाद्यवच्छिन्नाभावानांव्याप्यवृत्तित्वाभिधानंचसंयोगत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगिता
नवच्छेदकत्वस्यरचनायजन्यद्रव्येप्युत्पत्तिकालावच्छेदेनगुणत्वावच्छिन्नाभावस्यनवीनैरुपगमान्मतेगुणत्व
स्यसंयोगत्वविशिष्टसंबंधिनिष्ठाभावीयप्रतियोगितानवच्छेदकत्वंनसंभवतीतिगुणावृत्तित्वानुधावनंसंयोगित्वगु
णान्यत्वसत्त्वसत्त्वादित्यादेर्गुणावृत्तित्वंनविशिष्टहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकमतःसंयोगसाध्यक
वृत्तिव्यभिचारिमात्रेयादृशप्रतियोगितावच्छेदकमुपादायसंयोगत्वस्यपारिभाषिकावच्छेदकत्वंसंभवतितादृशधर्ममा
द्द्रव्यमात्रसमवेतत्वेति।प्रागभावलक्षणघटकदोषेणदूषयितुमुपन्यस्यतिसाध्यतावच्छेदकेविशिष्टेत्यादिवि
शिष्टाभावोविशेष्यविशेषणसंबंधाभावरूपउभयाभावस्तुपरंपरासंबंधेनद्वित्वाभावइतिमतेचेदंलक्षणंअन्यथा आधारप्रतियोगितावच्छेदक
धिकरणधर्मावच्छिन्नाभावोविनापिलक्षणसमन्वयसंभवप्रतियोग्यवृत्तित्वेतिग्रंथानुत्थितेरितिबोध्यंअवच्छेद धर्मसिद्धि(भावात्)
कत्वमिहानतिरिक्तवृत्तित्वंतत्त्वंचस्वरूपसंबंधविशेषःयथोक्तधर्मवैशिष्ट्यतादृशावच्छेदकावच्छेदकसंबंधमानाभावात्

ग॰ दी॰ शि॰ ५९

स्वपदं हेतुतावच्छेदकावच्छिन्नपरं तथा च साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यानतिरिक्तवृत्तिय
द्धर्मविशिष्टसमानाधिकरणसाध्याभाववत्त्वं तद्धर्मवत्त्वं व्याप्तिरिति समुदितार्थः । सद्धेतौ साध्यासमानाधिकरण
स्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य हेतुसमानाधिकरणत्वनियमात् तादृशसाध्याभाववत्त्वं साध्यसमा
नाधिकरण्यानतिरिक्तवृत्तित्वलक्षणसमन्वयः । गुणान्यत्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तेर्वारणाय
साध्यतावच्छेदकविशिष्टेति । साध्याधिकरणत्वं साध्यतावच्छेदकसंबंधेन बोध्यं तेन संयोगादिना धूमादेरभा
वस्य धूमादिमति सत्त्वाद् यत्र व्यापकत्वमपि नातिव्याप्तिः । द्रव्यत्वविशिष्टसत्त्वादित्यादावव्याप्तेर्वारणाय हेतुतावच्छेदक
विशिष्टत्वेनोपादानं तद्विशिष्टाधिकरणं हेतुतावच्छेदकसंबंधेन बोध्यं तेन धूमादिसमवायिनि स्ववृत्तिवाधवच्छि
न्नवह्न्याद्यभावस्य वह्न्यादिसामानाधिकरण्यविरहेऽपि न क्षतिः । वह्न्यादिसामानाधिकरण्यघटकवृत्तित्वं दै
शिकविशेषणतासंबंधेन बोध्यं तेन द्रव्यं सत्त्वादित्यादौ दैशिकविशेषणतया हेतुसमानाधिकरणस्य द्रव्यत्व
त्वावच्छिन्नद्रव्यत्वाद्यभावस्य कालिकादिसंबंधेन साध्यवन्महाकालादिवृत्तित्वेऽपि न क्षतिः । यद्यपि हेतुसमानाधि
करणसाध्याभावत्वघटकमभावत्वरूपं विशेष्यं व्यतिरेकिसाध्यके साध्यासमानाधिकरणाभावसाधारणमिति
विशिष्टसाध्यसामानाधिकरण्यप्रवृत्त्याहृत्तित्वरूपं तदनतिरिक्तवृत्तित्वं दुर्वचं तथापि यावन्तः स्वसमानाधिकरणसा
ध्याभावाविशिष्टसाध्यसमानाधिकरणाद्यत्यर्थस्य विवक्षणीयत्वान्न दोषः । यत्समानाधिकरणेति यद्रूपविशि राम ५९

=

ष्टसमानाधिकरणेत्यर्थः । तेन द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ सत्तासमानाधिकरणद्रव्यत्वत्वावच्छिन्नद्रव्यत्वाभाव
प्रमायां साध्यवत्ताज्ञानप्रतिबंधकत्वेऽपि न क्षतिः । यद्धर्मावच्छिन्नसामानाधिकरण्यघटकशरीरे च हेतुतावच्छेदकसंबंधेन यद्धर्मा
वच्छिन्नाधिकरणत्वं निवेशनीयं तत्प्रयोजनं च स्फुटमेव अधिकरणवृत्तित्वं च निरवच्छिन्नं ग्राह्यं तेन कपिसंयोगी एत
द्वृक्षत्वादित्यादौ हेतुसमानाधिकरणकपिसंयोगत्वावच्छिन्नकपिसंयोगाभावादिविषयकप्रमायाः व्याप्यवृत्तित्वज्ञा
नविरहकालिकायाः साध्यवत्ताज्ञानप्रतिबंधकत्वेऽपि न क्षतिः । प्रमायां प्रमासामान्ये तेन व्यभिचारिणि नातिव्याप्तिः
समानाधिकरणधर्मावच्छिन्नाभावत्वेन व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्ताज्ञानस्यापि विरोधित्वात् सद्धेताव
पि लक्षणगमनासंभव इत्यतो ज्ञानसामान्यमुपेक्ष्य प्रमासामान्यनिवेशनं प्रमापदं च यावत् भ्रमभिन्नपरं अन्यथा
भ्रमात्मकज्ञानस्याभावत्वांशे भ्रमत्वेऽपि न क्षतिः । साध्यवत्ताज्ञानपदमपि तत्सामान्यपरं तेन व्यधिकरणधर्मावच्छिन्न
साध्याभाववत्ताज्ञानस्य तद्धर्मवत्त्वेन साध्यवत्ताज्ञानविरोधित्वेऽपि न क्षतिः । एवं च साध्यपदं साध्यतावच्छेदकविशिष्ट
परं ज्ञानं च स्वसमानधर्मितावच्छेदकत्वेन स्वविषयीभूताभावप्रतियोगितावच्छेदकसंबंधसंसर्गकत्वेन च विशेष्यी
प्रमा) यं अन्तो धूमत्वाद्यवच्छिन्नसंयोगसंबंधावच्छिन्नप्रतियोगिताकधूमाद्यभाववत्ताज्ञानस्य साध्यवत्ताज्ञानसामान्यांत
र्गत द्रव्यत्वादिना धूमादिप्रकारकं भिन्नधर्मावच्छिन्नविशेष्यकधूमत्वावच्छिन्नप्रकारकं समवायादिसंबंधेन धूमत्वाद्य
= वच्छिन्नप्रकारकं च ज्ञानं स्य प्रतिबंधकं स्यात् कामिनीजिज्ञासादेरेव तत्तादृशज्ञानसामान्यविरोधित्वादिति

गा॰ टी॰ व्या॰
६०

व्याप्तेर्निरवकाशः। साध्याभावपदवैयर्थ्यादिति अत्र च साध्यतावच्छेदकविशिष्टसामानाधिकरण्यावच्छेदकत्वं स्वव्या
पकतादृशसामानाधिकरण्यकत्वं तथा च साध्यतावच्छेदकविशिष्टसामानाधिकरण्यत्वं यत्समानाधिकरणसाध्या
भावत्वव्यापकतावच्छेदकं तत्त्वं व्याप्तिरित्येतादृशार्थकत्वे प्रथमलक्षणे न साध्याभावपदवैयर्थ्यं यत्समानाधिकरणनि
ष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपं यत्सामानाधिकरण्यव्यापकतावच्छेदकत्वात् यत्समानाधिकरणसाध्याभाव
निष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपस्य यत्समानाधिकरणसाध्याभावत्वव्यापकतावच्छेदकत्वस्यातिरिक्त
तया तद्घटितलक्षणे यत्सामानाधिकरण्यव्यापकतावच्छेदकत्वस्य निवेशात् तद्घटितलक्षणसंभवेपि प्रकृत
लक्षणे वैयर्थ्यानवकाशात् एवं यत्समानाधिकरणसाध्याभावप्रमात्वव्यापकः साध्यवत्ताज्ञानप्रतिबंधकत्वाभा
वस्तत्त्वमित्येतादृशार्थे द्वितीयलक्षणेपि न तद्वैयर्थ्यं यत्समानाधिकरणाप्रमात्वव्यापकताघटकाभावान्यत्स
मानाधिकरणसाध्याभावप्रमात्वव्यापकतायामभावांतरस्यैव निवेशादित्यवधेयं॥ साध्याभाववतीति यन्निष्ठ
साध्याभाववद्वृत्तित्वविशिष्टनिरूपितविषयतासामान्ये प्रकृतानुमितिप्रतिबंधकतावच्छेदकत्वाभावस्तत्त्वमित्यर्थः
वह्निमान् धूमादित्यादौ हेतुनिष्ठसाध्याभाववद्वृत्तित्वविशिष्टनिरूपितविषयिताव्यधिकरणधर्मावच्छिन्नाभाववद्वृत्ति
त्वविषयितेव साधनवत्यनुमितिप्रतिबंधकतावच्छेदिका तच्छालिज्ञानस्यानुमितिप्रतिबंधकत्वात् व्यभिचारिणि सा
ध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितापि तादृशीति ज्ञानस्य च व्यभिचारज्ञानविधयानुमितिप्रतिबं

राम
६०

साध्याभावपदं सार्थकीकृत्य तस्यैव लक्षणांतरे तत्प्रकारांतरेण व्याप्तिमुपपादयति

साध्याभाववद्वृत्तित्वरूपविषयस्य प्रतिबंधकतावच्छेदककोटिप्रवेशादतिव्याप्तिः अतो विषयितापर्यंतनिवेशनं हेतुनिष्ठसाध्याभाव
वद्वृत्तितात्वविशिष्टप्रतिबंधकतावच्छेदकविषयतापर्याप्तिभावविवक्षणे साध्यप्रतियोगिकाभावमात्रनिवेशे व्यभिचारिण्यतिव्याप्तिः
प्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वावगाहि ... अनुमितिप्रतिबंधकतया तद्घटितविषयप्रतिबंधकतावच्छेदकविषयता
या अव्याप्तिः साध्यतावच्छेदकावच्छिन्नसाध्याभावनिवेशश्च नं सत्यवतीति तदुपेक्षितः॥

धकत्वात् तादृशविषयिताया अनुमितिप्रतिबंधकतावच्छेदकत्वाभावातिव्याप्तिः यन्निष्ठत्वानुपादाने धूमाद्यंशे वह्नि
त्वावच्छिन्नवद्वृत्त्यभाववद्वृत्तित्वावगाहि धूमनिष्ठविशिष्टनिरूपितविषयिताया अपि अनुमितिप्रतिबंधकतावच्छे
दकत्वात् वह्निमान् धूमादित्यादावव्याप्तिरतस्तदुपादानं तथा च धूमनिष्ठयत्किंचिदभाववद्वृत्तित्वस्य हेतुनिष्ठत्वाभावा
न्न दोषः। यन्निष्ठपदार्थनिरूपितविषयितासामान्येत्यत्र साध्याभाववद्वृत्तित्वविषयितासामान्यमुच्यते
तदा व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वमेव यत्समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वेनेता
दृशज्ञानीयहेतुनिष्ठत्वविधसाध्याभाववद्वृत्तित्वविषयिताया अप्यनुमितिप्रतिबंधकतावच्छेदकत्वादसंभ
वो व्याप्तिश्चेति साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वविषयिताविशेषणं तादृशविषयिता च न साध्याभा
ववद्वृत्तित्वस्य विशिष्टनिरूपिता तादृशविषयितानिरूपकस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य
विशेषणीभूतं यत्समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वं तद्विशिष्टत्वाभावात् न च तद्विशिष्टनिरू
पितत्वं यदि तदवच्छिन्ननिरूपकताकत्वं तदा समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य तद्धर्मविशे
ष्टत्वाभावे सत्यपि तद्भिन्नविषयितानिरूपकत्वे व्यधिकरणीभावावच्छेदकत्वात् भ्रमविषयितायास्तद्विशिष्टनिरूपि
तत्वमस्त्येव यदि च वस्तुगत्या यत्र तद्विशिष्टत्वं तन्निरूपितत्वमेव विशिष्टनिरूपितत्वं तदा व्यधिकरणधर्माव
च्छिन्नसाध्याभाववद्वृत्तित्वविशिष्टनिरूपितत्वमेवोक्तभ्रमविषयिताया अक्षतमेवेति स्यंतव्याहतिरिति वा

गा-दी-शि

६१

यां विशेषणीभूतधर्मांतर विशिष्टेनव्यावर्त्तमानस्य विशेष्यस्य सानेविशेषणांशेप्रकारीभवत्सांव्यक्तेविशे
ष्यसंबंधितावच्छेदकतायाभानात्साध्याभावव्रत्तित्वरूपविशेषणविशिष्टविषयेणानिरूपकीस्य
विषयितावावर्त्तनेव्यावर्त्तक विषयस्य आश्रयतयाव्यावर्त्तकंयत्साध्याभाववद्वृत्तितात्वंतस्यापिनिरूप
कतावच्छेदकीस्य विषयितावावर्त्तकत्वादुक्तभ्रमविषयितावावृत्तिः तद्व्यावर्त्तकविषयव्यावर्त्तकस्यतद्वि
शिष्टसाध्याभाववद्वृत्तितात्वस्यतादृशविषयतानिरूपकतानवच्छेदकत्वात् इति तादृशविषयितायालक्षणा
घटकत्वात् एवंचोक्तभ्रमविषयितावावर्त्तकतयैवसाध्याभाववत्त्वस्यदसार्थक्यं तादृशविषयितायाउक्त
क्रमेणहेतुनिष्ठसाध्याभाववद्वृत्तित्वविशिष्टानिरूपितत्वेपिहेतुनिष्ठाधेयतात्वविशिष्टनिरूपितत्वानपा
यात्दोंनचतावत्स्यैतनिवेशेपिवृत्तितावच्छिन्नप्रतियोगिकत्वेनव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकवद्धसा
वमवगाहमानतादृशाभाववद्वृत्तितावगाहियज्ञानंतदीयतादृशसाध्याभाववद्वृत्तित्वविषयतापिसाध्याभाव
वद्वृत्तित्वविशिष्टनिरूपितैवव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकोयत्साध्याभाववत्तद्वृत्तित्वस्यैवतत्रवि
शेषणतयाभानात्तद्विशिष्टत्वस्यचतादृशज्ञाननिष्ठविषयितानिरूपकसाध्याभाववद्वृत्तित्वेसत्वात् इतिदोष
तादवस्थ्यमितिवाच्यं अभावांशेसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेनसाध्यप्रकारकंव्यभिचारज्ञा
नमेवानुमितिविरोधि यत्रचव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावसाध्यतावच्छेदकावच्छिन्नप्रति
साध्याभावमनुपादायाधिकरणवृत्तितादिविशिष्टविषयितानिवेशेनवृत्तौसमानाधिकरणधर्मावच्छिन्नाभावाधिकरणी
यत्वभ्रमविषयितावारणेपिवृत्तिविशेषणेतभिन्नत्वकेधिकरणेसमानाधिकरणधर्मावच्छिन्नाभावभ्रमविषयितावारणा
संभवात्साध्यतावांशइतिनिवेशस्यापिसार्थक्यात् ६

रा-म

६१

योगिताकत्वसंबंधेनसाध्यंप्रकारस्तादृशज्ञानविषयघटकस्यसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधे
नसाध्यविशिष्टस्यव्यधिकरणधर्मावच्छिन्नाभावस्याप्रसिद्ध्यातादृशज्ञानविषयितायाविशिष्टनिरूपकत्वासं
भवात् नचैवंसमानाधिकरणधर्मावच्छिन्नसाध्याभावव्यधिकरणधर्मावच्छिन्नसाध्याभावद्वयविशेषिता
धिकरणवृत्तितावगाहिनः समानाधिकरणधर्मावच्छिन्नाभावांशेभ्रमरूपज्ञानस्यविषयितायाः व्यधिकरण
धर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविशिष्टनिरूपितत्वात्समानाधिकरणधर्मावच्छिन्नसाध्याभावविषयि
तानिरूपिताधिकरणविषयितानिरूपिताधेयत्वविषयितात्वेनचप्रतिबंधकतावच्छेदकत्वाद्व्याप्तिरितिवाच्यं
हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वविशिष्टनिरूपितविषयितायांप्रतिबंधकतावच्छेदकत्वाभावस्य
विवक्षणीयत्वात् उक्तभ्रमेचसमानाधिकरणधर्मावच्छिन्नाभावविषयितायास्तादृशविशिष्टनिरूपितत्वाभा
वेनतस्याएवचप्रतिबंधकतावच्छेदकत्वेनाव्याप्त्यनवकाशात् अथयत्रज्ञानेहेतुसमानाधिकरणतयाभा
समानेव्यधिकरणधर्मावच्छिन्नाभावव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसाध्यतावच्छेदकावच्छिन्नप्रतियोगिता
कत्वोभयसंबंधेनसाध्यस्यैकाप्रकारतातादृशज्ञानीयव्यधिकरणधर्मावच्छिन्नाभावीयविषयितायांसाध्यतावच्छेदका
वच्छिन्नप्रतियोगिताकत्वसंबंधेनसाध्यविशिष्टाभावनिरूपितत्वस्यविषयीसद्भावसाध्यतावच्छेदकावच्छि
न्नप्रतियोगिताकत्वासत्वेनासंभवेपिव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसंबंधेनसाध्यविशिष्टाभावनि

गा॰ टी॰ श्री॰
६२

रूपितत्वस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधविषयितानिरूपितविषयतात्वेनानुमितिप्रतिबंधकत्व तावच्छेदक
स्य चाक्षतत्वात् अव्याप्तिर्दुर्वारैवेति चेन्न तादृशभ्रमस्य अप्रामाणिकत्वात् प्रामाणिकत्वे च संसर्गीयविषयताद्वयी
निरूपकत्वेनाभावविषयताया विशेषणीयतया सामंजस्यात् अयं साध्यरूपविशेषणविशिष्टस्याभावस्य
तथा च विषयितानिरूपकत्वं लक्षणघटकत्वे साध्याभावयोः संबंधस्य संबंधविधया लक्षणघटकत्वमावश्यकं स च सं
बंधः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपश्चा
ननुगत इति प्रथमस्य निवेशे केवलान्वयिनि साध्ये विषयिताभावस्यैवाप्रसिद्धिः व्यतिरेकिसाध्यकसद्धेतौ
च तादृशहेतुसमानाधिकरणाभावाप्रसिद्धिरित्यसंभवः चरमस्य निवेशे च सर्वत्र व्यभिचारिण्युक्तिव्याप्तिः
प्रतियोगितावच्छेदकधर्माणां चोपलक्षणीभूतेन केनचिद्रूपेणानुगमय्य निवेशेन संभवति प्रतियोगितावच्
छेदकोपलक्षणस्य संबंधघटकतया भानात् न चावच्छेदकावच्छिन्नत्वविशिष्टप्रतियोगिताया एव संबंधतया नि शेष
निवंधनीतीमधूति वाच्यं वेशान्नानुगमः अवच्छेदकावच्छिन्नत्वानिवेशेन प्रतियोगित्वविषयकाभावस्य प्रतियोगिमत्ताज्ञानाविरोधि ताने
तया तज्ज्ञानाविरोधिनः प्रतियोगिविशेषिताभावज्ञानस्य चानुभवविरुद्धतया अवच्छेदकावच्छिन्नत्वाविशेषितप्र
तियोगितायाः संसर्गतया भानाभावात् न च स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन साध्यतावच्छेदकविशेषित ए
साध्यतावच्छेदक— वाभावो निवेश्यः नतु साध्यविशेषितवह्नित्वादिना धूमाभाववद्वृत्त्यादिसाध्यकस्थले लक्षणघटक इति वाच्यं

ग

ति

प्रमाणेदेतुक॰ १

राम
६२

प्रमेयत्वाद्यवच्छिन्नसाध्यकस्थले तादृशाभावाप्रसिद्धेः एवं स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन वह्नित्वा
विशेषितवह्नित्वादिना घटादेरभावविभासमाने यत्र संबंधघटकप्रतियोगितायां बाधितस्य वह्न्यादिनिष्ठत्व
स्य भानेन तादृशज्ञानीयाभावविषयिताया उक्तसंबंधेन साध्यतावच्छेदकविशिष्टाभावनिरूपितत्वतया अनु
मितिविरोधितया चानुपपत्तेर्दुर्वारत्वात् स्वावच्छिन्नसाध्यवृत्तित्वविशिष्टप्रतियोगितानिवेशे च सर्वत्र
सद्धेतावप्रसिद्धिः एवं प्रतियोगिविशेष्यतापन्न एवाभावप्रतियोगिपारतंत्र्येण समानाधिकरणधर्मस्य
स्वातंत्र्येण व्यधिकरणधर्मस्य स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन प्रकारत्वं प्रामाणिकं न तु प्रतियोगि
न॰ २ विशेष्यताएव वह्निर्नास्ति वह्नित्वेन घटो नास्तीत्येव प्रतीतेः नतु वह्नित्वेन नास्तीति तु स्यात् विशेष्यप्रतियोग्यवि व
शेषितस्योक्तसंबंधेन साध्यतावच्छेदकविशेषितस्याभावस्य विषयित्वनिरूपकतया निवेशेन संभवत्येवेति
चेन्नैवं प्रतियोग्यादिविशेषिताभावीयत्वेन विशिष्टनिरूपितविषयितालक्षणे न निवेश्यते अपितु स्वनिरू विषयिता
पक्षेत्वव्वाभिमावरू विशेषिता पकहेतुसमानाधिकरणाभावनि[illegible]ष्ठीयः संबंधः तत्प्रतियोगिसाध्यनिष्ठतत्संबंधावच्छिन्ननिरूपकतावच्छे
दकताकत्वेन यत्र हेतुसमानाधिकरणघटत्वावच्छिन्नवह्न्याद्यभावे वह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वसं
बंधेन वह्न्यादेः साध्यस्य प्रकारतानादृशज्ञानविषयितानिरूपकाभावनिष्ठोनिरुक्ततन्निरूपकतावच्छेदक
संबंध इति तद्विषयिताव्युदासः यत्र वह्नित्वावच्छिन्नघटाभावे तन्निष्ठवह्नित्वावच्छिन्नप्रतियोगिताकत्वमेव वह्नेः
वच्छेदकता

गा॰ शि॰ टी॰ संबंधेनयाभासतेतत्रतत्संबंधप्रतियोगिनवह्निरपितुघटएवेतिसाध्येवास्तवतत्संबंधप्रतियोगित्वनिवेशात्ताद
६३ शज्ञानीयाभावविषयिताव्युदासः साध्यनिवेशाद्यत्रवह्नित्वेनघटएववह्नित्वावच्छिन्नप्रतियोगिताकत्वसं
बंधेनतत्संबंधप्रतियोगिनिवह्नित्वावच्छिन्नघटाभावप्रकारकस्तादृशज्ञानीयाभावविषयितायास्तत्संबंध
प्रतियोग्यवच्छिन्ननिरूपकताकत्वेप्यनुमितिविरोधित्वेपिचनविरोधः यत्रघटत्वावच्छिन्नवह्न्यभावेघटत्वाव
च्छिन्नप्रतियोगिताकत्वमेववह्नित्वावच्छिन्नप्रतियोगिताकत्वत्वेनवह्निःसंसर्गतयाभासतेतादृशज्ञानस्य
प्रामाणिकत्वेसाध्यप्रतियोगिकोहेतुसमानाधिकरणाभावानुयोगिकोयद्धर्मावच्छिन्नप्रतियोगिताक
त्वसंबंधः तद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसंबंधावच्छिन्नसाध्यनिष्ठनिरूपकतावच्छेदक
त्वेविवक्षणीयमितिदिक् व्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वविषयितायांप्रतिबंधकतावच्छेदकत्वा
भावादतिव्याप्तिरतः सामान्येइत्युक्तं प्रकृतानुमितिपदंप्रकृतानुमितिसामान्यपरं अन्यथाव्यधिकर
भावं णधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविषयकसम्हालंबनात्मकप्रकृतानुमितिप्रतिबंधकतावच्छेदकत्व
स्यहेतुनिष्ठतादृशसाध्याभाववद्वृत्तित्वविषयतायामसत्वात्संकेतावपिलक्षणगमनासंभवात् एवंप्रकृ
तेत्यनुपादानेकामिनीजिज्ञासादोषप्रसिद्धायाअनुमितिसामान्येप्रतिबंधकतातदंकतायाबाधप्रमाभावव
द्वृत्तित्वादिविषयितायामसत्वमेवचतद्विषयकज्ञानस्यापिअन्यलिंगकान्यसाध्यकान्यसंसर्गकानुमि
राम ६३

ति तिप्रतिबंधकत्वात् अतः प्रकृतेतितत्साध्यकतद्धेतुकतत्संसर्गकपरं सद्धेतुनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्या
भाववद्वृत्तित्वविषयितायांअनुमितिप्रतिबंधकतारूपसिद्ध्यादिज्ञानवृत्तित्वादसंभवस्यादतोयन्निष्ठसाध्या
भाववद्वृत्तित्वविषयकज्ञानसामान्यस्यानुमितिप्रतिबंधकतावच्छेदकत्वमुपेक्ष्यनिरूकविषयितासामान्येअ
नुमितिप्रतिबंधकतावच्छेदकताभावपर्यंतानुधावनं अवच्छेदकत्वंचस्वरूपसंबंधविशेषः नचधूमाभाववद्वृ
त त्तित्वेनघटादिविषयकज्ञानस्यानुमितिप्रतिबंधकतयाधूमाभाववद्वृत्तित्वविशिष्टविषयताशालिज्ञान
त्वेनप्रतिबंधकताकल्पनस्यासंभवात्तादृशविषयितायांप्रतिबंधकतानिरूपितस्वरूपसंबंधरूपावच्छेद
त कत्वासत्वेनातिव्याप्तिरितिवाच्यं धूमाभाववद्वृत्तित्वप्रकारितानिरूपितविषयिताशालिज्ञानत्वेनासा
धारणप्रतिबंधकताकल्पनासंभवात् तादृशविषयितात्वेनवास्तवधूमाभाववद्वृत्तित्वविशिष्टनिरूपि
तविषयितायाः प्रतिबंधकतावच्छेदकत्वस्याक्षतत्वात् नचैवंसमानाधिकरणधर्मावच्छिन्नसाध्याभावव्यधि
करणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविषयिताधिकरणवृत्तित्वावगाहिनः समानाधिकरणधर्मावच्छिन्नाभावां
शेभ्रमरूपज्ञानस्यविषयितायाव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविशिष्टनिरूपितत्वासमानाधि
करणधर्मावच्छिन्नसाध्याभावविषयितानिरूपिताधिकरणविषयितानिरूपितविषयतात्वेनचप्रतिबंधक
तावच्छेदकत्वादव्याप्तिरितिवाच्यं हेतुसामानाधिकरण्यविशिष्टत्वविशिष्टनिरूपितायांप्रतिबंधकतावच्छेद

कत्वाभावस्य विवक्षणीयत्वात् उक्तस्थले च समानाधिकरणधर्मावच्छिन्नविषयितायास्तादृशविशिष्टनिरूपि
तत्वाभावेन तस्या एव प्रतिबंधकतावच्छेदकत्वेनाव्याप्त्यनवकाशात् न च व्यभिचारज्ञानस्यानुमितिकारणी
भूतव्याप्तिज्ञानं प्रत्येव प्रतिबंधकत्वादनुमित्यप्रतिबंधकत्वमिति व्यभिचारिण्यतिव्याप्तिरिति वाच्यं तज्जनकज्ञान
प्रतिबंधकतावच्छेदकत्वाभावस्यैव विवक्षितत्वात् अनुमित्यविरोधित्वज्ञानस्य अनुमितिप्रतिबंधकतावच्छे
दकत्वाभावप्रकारकज्ञानस्यैव अनुमितिहेतुत्वेइति एतन्मते निरुक्तविषयितानिष्ठतादृशावच्छेदकत्वाभा
वघटितस्यैव अनुमितिकारणीभूतज्ञानविषयत्वादिति भावः अनुमित्यविरोधितया अनुमितिजनकज्ञाना
प्रतिबंधकतया साध्याभाववद्वृत्तित्वज्ञानस्यानुमितिजनकत्वाभावादिति भावः अतिप्रसंगादिति हेतुनि
ष्ठसाध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितासामान्येऽनुमितिजनकज्ञानप्रतिबंधकत्वाभाव
स्यासत्त्वादिति भावः न च हेतुनिष्ठसाध्याभाववद्वृत्तित्वविषयितानुमितिप्रतिबंधकतावच्छेदिका उक्तस्थले ताद
शज्ञानीयहेतुनिष्ठसाध्याभाववद्वृत्तित्वज्ञानीयविषयितायाअपि तादृशविषयितासामान्यांतर्गतत्वात्तत्र च
प्रकृतव्याप्तिज्ञानप्रतिबंधकतावच्छेदकत्वस्यापि सत्त्वेनातिव्याप्त्यनवकाश इति वाच्यं तथा सति संयोगादिमान्द्रव्यत्वादि
त्यादौ व्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वेनानुमितिप्रतिबंधकतावच्छेदकसमानिष्ठतादृशसाध्याभा
ववद्वृत्तित्वविषयितायामनुमितिप्रतिबंधकतावच्छेदकत्वसत्त्वेन लक्षणगमनासंभवात् इतरविशेषण ॥ राम ६४

वैयर्थ्येन तादृशविषयितायाः एकलक्षणेनिवेशस्य तत्वाविषयितानिवेशेप्यन्तेन साध्याभाववद्वृत्तित्वविषयितायाः प्रति
बंधकतावच्छेदकत्वेनाऽतिव्याप्तिवारणासंभवादित्थमित्यध्येयं ॥ ॥निरुक्तीयासजात्यघटनेन साध्याभाववद्वृत्तित्व
रूपं व्याप्तिं परिष्कृत्योपन्यस्यति यावंतइति धूमवान्वह्नेरित्यादौ व्यधिकरणधर्मावच्छिन्नाभावसजातीयस्य घट
त्वादिनातदधिकरणवृत्तित्वाभावस्य हेतौ सत्त्वादतिप्रसंगो अतो यावंत इति तथा च यावदंतर्गतसमानाधिकर
णधर्मावच्छिन्नाभावसजातीयस्य तदधिकरणवृत्तित्वाभावस्य हेतावसत्त्वान्नातिव्याप्तिः तत्रैव समानाधिकर
णधर्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिवारणाय प्र
इति तेकेतत्सजातीयांतर्भावस्य मापरत्वेन व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभावस्य समानाधिकरणध
र्मावच्छिन्नसाध्याभावसजातीयत्वाभावान्न दोषः याबदसाध्याभावत्वेन साध्याभावानां निरूपकतयासाजात्येऽन्वये
= च व्यतिरेकिसाध्यके वह्निमान्धूमादित्यादौ यावत्साध्याभावनिरूपितत्वस्य क्वचिदपि साजात्येऽसत्त्वात्साध्या
भावसाजात्याप्रसिद्ध्याऽव्याप्तिरतस्तत्तद्व्यक्तित्वेन तेषां साजात्येन्वयलाभ इति यत्तदादिति तत्तत्सजातीया
इत्यनेनोपस्थितानां समानाधिकरणव्यधिकरणधर्मावच्छिन्नाभावसजातीयानां एकस्मिन्नधिकरणवृत्तित्वसा
वे एकत्रद्वयमितिरीत्यान्वयव्यतिरेकिसाध्यके व्याप्तिः एकत्रोभयसाजात्याभावादतएकैकाभावे एकैकाभाव
सजातीयाभेदान्वय उपगंतव्यः एतदर्थता यद्यत्प्रत्येकमिति प्रथमावधुवचनांततत्तदधिकरणवृत्तित्वा

व्या०दी०शि०
६५

साभावाश्रयत्वस्यापि विशेषणत्वे ॥ यावत्साध्याभावत्वेन साध्याभाववतामधिकरणेऽन्ययेयवह्निमान्धूमादित्यादौ तत्तद्वृत्ति
त्वावच्छिन्नसाध्याभावघटितसमुदायाधिकरणतायाः क्वचिदप्रसिद्ध्यानाव्याप्तिः स्यादतस्तत्तद्व्यक्तित्वेनसा
ध्याभाववतामधिकरणेऽवयवसाध्यवरमन्तनादिति तत्त्वमिति अव्यभिचरितत्वमित्यर्थः ॥ ननु तत्तत्स्वजा
तीयत्वं तत्तद्वृत्तिधर्मत्वं तथा च समानाधिकरणधर्मावच्छिन्नाभाववत्त्वस्य साध्यत्वादिधर्मवत्त्वं व्यधिकरण
धर्मावच्छिन्नाभावेपि वर्तत इति तस्यापि तत्सजातीयत्वाद्व्यभिचारित्वं न त्वव्याप्तिरत आह साजात्यं चेति स
मानाधिकरणेति समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वव्यधिकरणधर्मावच्छिन्नप्रतियोगिताक
त्वान्यतररूपेणेत्यर्थः ॥ तृतीयार्थश्चाभेदस्तस्य च साजात्येऽन्वयः ॥ विवक्षणीयमिति शेषः ॥ तथा च तत्तत्स
जातीयाभावस्य तत्तत्साधवत्त्विलादृशान्यतररूपवत्त्वस्यान्वयबोधः ॥ यद्यपि वह्नित्वावच्छिन्नाभावनिष्ठसमा
नाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं वह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वरूपं तच्च तदधिकरणवृत्तित्वा
भावेऽसंभावितमेव तथापि स्वासमानाधिकरणधर्मावच्छिन्नाभावीयाप्रतियोगितात्वन्निरूपकत्वं स्वसमाना
धिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं स्वसमानाधिकरणधर्मावच्छिन्नाभावीयप्रतियोगितात्वन्निरूपकत्व या
मेव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमिति विवक्षितं तत्र साध्याभाववद्वृत्तित्वाभावोऽसाधारणमेव
समनियताभावैक्यमते च स्वाधिकरणावृत्तिधर्मावच्छिन्नाभावीयप्रतियोगितात्वन्निरूपकत्वरूपो व्यधिकरणध

(समनियताभावानैक्यमते संभवितत्वं घटत्वेन गगनत्वं घटत्वाभावे घटत्वावच्छिन्नत्वावृत्तिनिष्ठप्रतियोगितानिरूपकत्वाभावात्) राम ६५

र्मावच्छिन्नप्रतियोगिताकत्वं तस्य यथाश्रुतार्थ एवाहरणीयः ॥ तन्मते व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्ति
त्वाभावयोरैक्यात्तादृशसाध्याभावस्य यादृशप्रतियोगितानिरूपकत्वं तादृशप्रतियोगितानिरूपकत्वस्य तद्व्यावृ
धतद्वृत्तित्वाभावेपि सत्त्वात् ॥ एतेन समनियताभावैक्यमते व्यधिकरणधर्मावच्छिन्नाभावस्य समवायादिसं
बंधावच्छिन्नगगनत्वाद्यवच्छिन्नगगनाद्यभावाभिन्नतया तत्समानाधिकरणधर्मावच्छिन्नगगनादिनिष्ठ
प्रतियोगितानिरूपकतया व्यधिकरणधर्मावच्छिन्नाभावस्य निरुक्तरूपत्वानुपपत्त्या स्वसमानाधिकरण
धर्मावच्छिन्नसमानाधिकरणसंबंधावच्छिन्नप्रतियोगितानिरूपकत्वपर्यन्तनिवेशनीयत्यासोनापाद्यः ॥ समनि
यताभावैक्यमते गगनत्वाभावत्वगगनाभावभिन्नत्वान्यतररूपेणापि साजात्यलक्षणं संभवतीति ध्येयम् ॥ ननु
यावत्साध्याभावान्तर्गतानां तत्तत्साध्यव्यक्त्यभावादीनामधिकरणे हेतोर्हि यावद्वह्निमान्धूमादित्यादावव्याप्ति
रत आह साध्याभावश्चेति द्वितीयरीत्येति ॥ यत्समानाधिकरणानामित्यादिद्वितीयलक्षणरीत्येत्यर्थः ॥ साध्य
तावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावविवक्षणेन तथाविधवह्निघटोभयाभावमादाय
तद्दोषतादवस्थ्यमतः प्रथमरीत्येति नोक्तं ॥ साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावविवक्षणे वाच्यत्वादि
साध्यकस्थले वाच्यत्वत्वादिना घटाद्यभावमादाय लक्षणासमन्वयोपि स्वरूपसंबंधेन तादात्म्यसंबंधेन वा वृत्ते
यमात्रसाध्यकस्थले तथाविधाभावाप्रसिद्ध्या अव्याप्तिरतो व्यापकतावच्छेदकपर्यन्तानुधावनं ॥ तथा च वह्ने

अन्यतराभावानि
अ॰ निरूपिता

स्वसमानाधिकरणाभावप्रतियोगिस्वसमानाधिकरण्य

गा॰ टी॰ ६६

यत्त्वादिना व्याप्यत्वाभावस्यैव तत्त्वेऽपि न दोषः। साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशे च वह्न्यादिसा
ध्यके तार्णातार्णोभयाभावादिकमादाय दोषस्य व्यासज्यवृत्तिधर्मानवच्छिन्नत्वे प्रतियोगितायां निवेशे वारणे
ऽपि सत्त्वादिसाध्यकस्थले विशिष्टसत्ताघटाभावमादाय दोषस्य तादवस्थ्यात् अभावो न निवेशितः। व्यापकतावच्छेदका
वच्छिन्नप्रतियोगितान्यवृत्तिधर्मावच्छिन्नाजातिरिक्तवृत्तिधर्मावच्छिन्नायाः प्रतियोगितायास्तदन्यत्वेन विशेष
णीया। तेन वह्न्यादिसाध्यकस्थले वह्नित्वादिना महानसीयवह्निघटान्यतराभावमादाय न दोषः। न्यूनवृत्तित्व
मतिरिक्तवृत्तित्वं च विरुद्धव्यावर्त्तकं निर्वाच्यं। नातो व्यधिकरणधर्मावच्छिन्नाभावासंग्रहः। व्यापकता च साध्य
तावच्छेदकसंबंधावच्छिन्नाया ग्राह्या। तेन संयोगादिना वह्न्यादिसाध्यके समवायादिना वह्न्याद्यभावमादायासं
भववारणाय साध्यतावच्छेदकसंबंधावच्छिन्नत्वेन प्रतियोगितायां विशेषणीयतया समवायादिना द्रव्यत्वा
दिसाध्यके विषयतादिसंबंधेन साध्यव्यापकस्य ज्ञानादेः समवायादिनाभावमादाय दोषानवकाशः। स्वाद
त्म्यसंबंधेन प्रमेयसाध्यकस्थले समवायित्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकभेद एव ल
क्षणघटकः। समनियताभावैक्यमते तादृशभेदस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेऽपि साध्यसिद्ध
तया व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेन तत्साजात्यस्य प्रसिद्धिसंभवात्। यत्तु संयोगेन प्रमेयत्ववान
तिष्ठतीति साक्षिकः संयोगावच्छिन्नप्रमेयत्वनिष्ठप्रतियोगितावच्छेदकताकभेद एव लक्षणघटकः। अतएव

राम ६६

तादाभावस्यैव येन संबंधेन तद्वृत्तिर्यो धर्मस्तत्संबंधेन तदवच्छिन्नप्रतियोगितावच्छेदकताकभेदस्यापि उक्तप्रती
तिबव्याप्तिसिद्धिरिति तन्न वह्निमान् धूमात् गुणवान् द्रव्यत्वात् इत्यादौ विषयितादिसंबंधेन वह्नित्वगुणत्वादिम
तः साध्यतावच्छेदकसंबंधावच्छिन्नाभावस्य व्यावर्तनाय व्यापकतावच्छेदकताघटकसंबंधावच्छिन्नत्वेन प्रति
योगितावच्छेदकताया अवश्यनिवेशनीयतया तादृशाभावस्य प्रामाणिकत्वोपलक्षणघटकत्वासंभवात्।
ननु कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगत्वावच्छिन्नाभावस्यापि लक्षणघटकतया तद्विकरणे
वृक्षे तादृवृत्तेरव्याप्तिः। न च साध्यतावच्छेदकावच्छिन्नव्यापकताशरीरे प्रतियोगिवैयधिकरण्यानिवेशस्य
निष्फलतया कपिसंयोगत्वादेः साध्यव्यापकतावच्छेदकत्वाभावात्तादृशाभावानां लक्षणाघटकत्वमिति वाच्यं।
संयोगेन वह्न्यादिसाध्यकस्थले वह्नित्वादिनो संयोगरूपसाध्यतावच्छेदकसंबंधघटितव्यापकतावच्छेदक
त्वसंपत्तये व्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशस्यावश्यकत्वात्। अन्यथा साध्यवत्प्रतियोगिका
भावछेदेन वह्नित्वद्रव्यत्वाद्यवच्छिन्नस्य संयोगसंबंधेनाभाववत्त्वात् साध्यतावच्छेदकसंबंधघटितव्यापक
तावच्छेदकत्वस्यैवाप्रसिद्धिप्रसंगात्। तथा च तत्तदधिकरणपदेन तत्तदभावीयव्याप्यवृत्तित्वनिरूपकाधि
करणमेव विवक्षणीयं। व्याप्यवृत्तित्वनिरूपकत्वं च निरवच्छिन्नाधेयतानिरूपकत्वं। एवं च संयोगाभा
वस्य तथाविधाधिकरणं गुणादिरेवेति न दोषः। इत्थं च कपिसंयोगाभाववान् कपिसंयोगाधिकरणत्वा

गा॰ टी॰ शि॰ ६ नं

साधयत्नेमत्वादित्यादौकपिसंयोगतदधिकरणत्वादिरूपाणांयावत्साध्याभावानांतत्प्रतिसंभसाध्यानांतथावै
धाधिकरण्याप्रसिद्ध्याव्याप्तिरतःसाध्याभावव्याप्यवृत्तित्वेनविशेषणीयंव्याप्यवृत्तित्वंचेतितथाचतादृशाभावस्य
तथाविधयावदंतर्गतत्वतयातथाविधाधिकरण्याप्रसिद्धयापिनक्षतिःव्याप्यवृत्तित्वंचनिरवच्छिन्नवृत्तिकत्वंनतु
वच्छिन्नवृत्तिकत्वंतथासतिसंयोगेनधूमादिसाध्यकव्यभिचारिणिसंयोगेनधूमस्याद्यवच्छिन्नधूमाभावस्य
प्र॰ अभावा॰ भा॰ महानसादाववच्छिन्नवृत्तिकतयाव्यधिकरणत्वात्साध्यतावच्छेदकसंबंधघटिततद्व्यापकतावच्छेद
कत्वावच्छिन्नप्रतियोगिताकत्वविरहेणव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैवलक्षणघट
कतयातिव्याप्तिःएवंचवह्न्यादेःसंयोगेनसाध्यस्यापिकपिनिरवच्छिन्नवृत्तिकत्वेनलक्षणाघटकतयात
दीयाव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वाभावमादायदोषवारणाव्यधिकरणपदस्यव्याप्यवृत्तितानि
रूपकाधिकरणपरत्वमावश्यकमिति वस्तुतःकालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभावसा
ध्यकात्मत्वादिहेतावव्याप्तिःव्याप्यवृत्तेःसाध्याभावस्याकाशाभावरूपस्यव्याप्यवृत्तितानिरूपकाधिक
रणाप्रसिद्धेरतोरैतरतस्तदभावीयप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणमेवतत्त
दधिकरणपदेनविवक्षणीयंप्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशादेतद्रूपान्यत्वविशिष्टगुणस्यावगु
णत्वादित्यादौसमवायेनसाध्यतावच्छेदकसंबंधघटितविशिष्टसाध्यव्यापकतावच्छेदकविशिष्टगुण

शम ६

त्वावच्छिन्नाभावस्यप्रतियोगिवैयधिकरण्यनिरूपकतयाहेतुमत्यसत्त्वेपिनातिव्याप्तिःतथाचकालिकसंबंधा
प्रतियोगिता वच्छिन्नाकाशत्वाभावाभावादिसाध्यकात्मत्वादिहेतावव्याप्तिःतत्रव्याप्यवृत्तियावत्साध्याभावांतःप्रति
नःआकाशत्वाभावादेःप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्याप्रसिद्धेःकालिक्याकाशावच्छेदेन
तादृशसाध्यरूपतदभावीयप्रतियोगिसत्त्वात्सर्वत्रैवतादृशाभावस्यप्रतियोगिसमानाधिकरणत्वात्
अतोव्याप्यवृत्तित्वमुपेक्ष्यतादृशाभावप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यमेवनिवेशयतिप्र
तियोगितावच्छेदकावच्छिन्नेतिअत्रचरमंनियतनामावेवमतेविशेषाभेवव्यधिकरणधर्मावच्छिन्नाभावप्र
तियोगितयाव्यतिरेकयनधिकरणाप्रसिद्धातदसंग्रहःविशिष्टसाध्यव्यापकतावच्छेदकावच्छिन्नयत्कि
चित्प्रतियोगिताश्रयवैयधिकरण्यनिवेशोचवाच्यस्तत्रादिनाघटघटाभावस्यघटादिवैयधिकरण्येनलक्ष
णघटकतानिर्वाहःप्रतियोगिसत्त्वेनप्रतियोगितासंबंधमतेजन्यज्ञानविषयत्वादिसाध्यकेयत्किंचित्का
लावच्छेदेनपरसाध्यवादोद्भासितस्यसाध्यतावच्छेदकावच्छिन्नाभावस्ययत्किंचित्प्रतियोग्यनधिकरण
वृत्तेःप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्ध्याव्याप्तिःतत्रापियत्किंचित्प्रतियोगितात्वस्य
वेनतादृशानधिकरणत्वाप्रसिद्धिसंपादनेनयत्किंचित्प्रतियोगिताश्रयप्रतियोगिवैयधिकरण्यनिरूप
काधिकरणेहेतावृत्तेरव्याप्तिरतादवस्थ्यंएवंवह्निमान्धूमादित्यादौद्रव्यत्वाद्यवच्छिन्नस्यसंयोगेनधो

गा॰ दी॰ वि॰

६७

सावच्छत्वस्य वृक्षेऽप्युत्पत्तिकालावच्छेदेन वर्त्तमानस्य गुणादेः प्रतियोगिव्यधिकरणस्य प्रतियोगिवैयधिकर-
ण्यनिरूपकाधिकरणगुणादौ हेतुतावच्छेदकसंबंधेन हेतोरप्रसिद्ध्या व्याप्तिवारणाय हेतुतावच्छेदकसं-
बंधेन यस्याधिकरणप्रतियोगिवैयधिकरण्यमभावविशेषणीयं एवं च एतद्रूपान्यत्वविशिष्टसत्ता-
वान् जातेरित्यादौ समवायघटितसाध्यव्यापकतावच्छेदकविशिष्टसत्तात्वावच्छिन्नाभावस्य हेत्वधिकर-
णे सत्तादिरूपप्रतियोगिसमानाधिकरणतया व्यधिकरणधर्मावच्छिन्नाभावस्य वक्ष्यमाणघटकत-
यातिव्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नेति। अथ केवलान्वयिसाध्यके लक्षणघटकानां वाच्यत्-
त्वावच्छिन्नघटाद्यभावानां सर्वेषामेव प्रतियोगितावच्छेदकवाच्यत्वत्वावच्छिन्नानधिकरणाप्रसिद्धिः।
न च यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तित्वमपि निवेशनीयं तथा च सम्बन्धितासंबन्धेनाभावानां
केवलोपगमेन व्यतिरेकितावच्छेदकधर्मस्यापि [illegible]काभावप्रतियोगितावच्छेदकतया तदवच्छिन्नानधिकरण-
त्वस्य प्रसिद्ध्या तेषां लक्षणघटकत्वेति वाच्यं तथा सति संयोगाभावसाध्यकस्थले संयोगाद्यात्मकाभा-
वस्य यत्किंचित्प्रतियोगितावच्छेदकसमवेतसामान्याभावत्वावच्छिन्नानधिकरणवृत्तित्वाद्व्याप्तत्वासं-
भवात् विशिष्टसाध्यव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदकविशेषणस्योक्तस्थले तादृशप्रतियोगि-
तावच्छेदकावच्छिन्नानधिकरणाप्रसिद्धेर्दुर्वारत्वात् प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृ-

स॰ भावा॰ संयोगसमवेत

राम

६८

त्तित्वनिवेशे च व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यप्रसिद्ध्या तादृशाप्रति-
योगिवैयधिकरण्यं दुर्घटमिति चेन्न अत्र केचित् स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिसमानाधिक-
रणाभेद्यत्वं [illegible] वैयधिकरण्यं तात्पर्यं। ननु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वं व्यधिकर-
णधर्मावच्छिन्नाभावस्य प्रतियोग्यप्रसिद्ध्या संभवात् न च वंशादिधूमवान्वह्नेरित्यादौ साध्यतावच्छेदकीभूत-
संयोगसंबंधघटितव्यापकतावच्छेदकधर्मत्वाद्यवच्छिन्नसंयोगसंबंधावच्छिन्नप्रतियोगिताकानां उत्पत्ति-
कालावच्छेदेन धूमादिमति [illegible] व्यधिकरणधर्मावच्छिन्नाभावस्यैव प्रतियोगितावच्छेदक[illegible] प्रतियोगि-
व्यधिकरणतयातिव्याप्तिरिति वाच्यं साध्यतावच्छेदकसंबंधेन व्यापकतानिवेशस्य येन येन संबंधेन व्यापकता तत्तत्सं-
बंधावच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावविशिष्टव्यवस्थितासंबंधेन साध्यव्यापकज्ञानस्य समवायसंबंधा-
वच्छिन्नाभावमादायोक्तदोषस्य वारणीयतया योगोक्तसंदादरभावमादायोप्यतिव्याप्तिवारणसंभवात्
यादृशप्रतियोगितावच्छेदकावच्छिन्नधर्मस्तद्विशिष्टतादृशप्रतियोगिता[illegible]सामानाधिकरण्यं विवक्षणीयं तेन नो
मनियतासावेक्यमत[illegible] वाच्यत्वत्वादिना घटाद्यभावस्यापि घटत्वादिना वाच्यत्वाभावाभिन्नत्वाद्वाच्यत्वादिरूपप्रति-
योगिसमानाधिकरणत्वेऽपि न क्षतिः। नन्वेवमपि वाच्यत्वादिसाध्यकस्थले सर्वेषामभावानां [illegible]
द्विशिष्टस्वाभावरूपप्रतियोगिना समानाधिकरणतया प्रतियोग्यसमानाधिकरणाभावाप्रसिद्धिरिति वाच्यं।

संयोगाभावेऽप्रसिद्धस्य भावानाधिकरण तादृश

हवति॰ वेति

१ वाच्यत्वादिप्रतियोगिताकत्वे प्रतियोगितावच्छेदवाच्यत्वत्वादिविशिष्ट

[illegible]

न

आनेमो.. (?)

संबंधावच्छेदकविशिष्टस्वाश्रयाधिकरणवृत्त्यभावप्रतियोगितासिन्नत्वेन व्यापकतावच्छेदकावच्छिन्नप्रतियोगि
ताविशेषणीयेत्यत्रेव प्रतियोगितावच्छेदकेत्यादेस्तात्पर्यात् वाच्यत्वाद्यवच्छिन्नघटादिनिष्ठप्रतियोगिता
याः स्वावच्छेदकविशिष्टस्वाश्रयाप्रसिद्ध्या निरूपकप्रतियोगितासिन्नत्वेन तन्निरूपकाभावमादाय वा
च्यत्वादिसाध्यके केवलान्वयिसत्त्वात् न च लक्ष्यापि एतदभावभिन्नमेयत्वादित्यादौ साध्यव्याप
कतावच्छेदकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य तदभावमात्रे एतेरभावमात्राधिक
रणकतया अधिकरणस्वरूपत्वात् तत्तदभावस्य तादिरूपप्रतियोगिसमानाधिकरणतया निरूपकप्रतियो
गितासिन्नव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकोऽभावो व्यधिकरणधर्मावच्छिन्नाभावस्य व्याप्ति
व्याप्तिरिति वाच्यं स्वावच्छेदकविशिष्टस्वाश्रयाधिकरणेऽस्वनिरूपकाभावत्वेन वृत्तितया भावस्तदीयप्रति
योगितासिन्नत्वेन व्यापकतावच्छेदकावच्छिन्नप्रतियोगितायाविशेषणीयतया एतदभावाधिकरणे एतद
त्वं भावभिन्नएतदभावत्वेन एतदभावस्य एतदभावभेदाभावस्य वृत्तावपि तादृशाधिकरणे एतदभावभेदाना
वृत्तेरप्रतीतेः एतदभावभेदत्वावच्छिन्नप्रतियोगिताकाभावत्वेन तस्या वृत्तित्वादेः। तदभावभेदत्वावच्छिन्नप्र
तियोगितायाः निरूपकप्रतियोगितासिन्नरूपस्य तत्त्वादित्याहुः तदसत्सं व्यापकताघटकसंबंधावच्छिन्नाभा
वनिवेशे व्यापकताशरीरप्रतियोगिवैयधिकरण्यस्याभावविशेषणत्वेऽपि संयोगादिना धूमादिसाध्यकव्या

भिचारिणि अयोगोलके अन्यत्वाद्यभावमादाय अतिव्याप्तिवारणसंभवात् केवलान्वयिवैशिष्ट्यप्रयोजनाभावेनाव्याप्य
वृत्तिसाध्याभावमादाय अव्याप्त्यनवकाशात् तदभावे व्याप्यवृत्तित्वादिविशेषणव्यावृत्त्यसंगतेः अस्तु वा साध्यव्याप
कतावच्छेदकरूपस्यापि साध्यवृत्तित्वे व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकतया तदभावव्यावर्तनाय व्या भाव
